॥ कोबातीर्थमंडन श्री महावीरस्वामिने नमः ॥

॥ अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ॥ ॥ गणधर भगवंत श्री सुधर्मास्वामिने नमः ॥

॥ योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ॥ ॥ चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ॥

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

## जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अथमुद्गलाचार्यकृतार्याशतकप्रारंभः

For Private And Personal Use Only

 

श्रीगणेशायनमः ॥ श्रीसीतारामचन्द्राभ्यानमः ॥ सीतालतासमासक्तरामकल्पमहारुह ॥ सफलं
शीतलच्छायंश्रांतविश्रांतिदंभजे ॥ १ ॥ मद्मुद्गलभट्टेनरामचंद्रप्रभोःकृता ॥ आर्यावृत्तस्तुतिस्त-
स्याव्याख्यानंक्रियतेस्फुटं ॥ २ ॥ तत्रप्रथमंवृत्तं त्वयीति हेरामभद्र त्वयिसकलांतर्यामिणीश्वरेवि
मुखेःननुकूलेसति श्रवणादिभक्त्यानाराधितत्वात् वर्त्तमानसामीप्येवर्त्तमानद्वेतिभविष्यद्वर्तमान

त्वयिविमुखेवमखमुख्येसख्येनान्यस्यकस्यजीवामि॥जीवामितभवदर्पितवसना-
शनमात्रजीवनाःसर्वे॥ १ ॥ ॥ छ सामीप्येलट् किंलक्षणेत्वयि मखमुख्ये मखेषुयज्ञे

षुमुख्येप्रधाने यज्ञोहवै विष्णुरितिश्रुतेः ईज्यत्वेनफलदातृत्वेनवामुख्यत्वं एवंभूतंत्वांविहाया
न्यस्यकस्यदेवतांतरस्यसख्येनानुकूल्येनजीवामि नजीविष्यामीत्यर्थः ॥ तवसख्येनैवजीवामीति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वितीयजीवामीतिपदस्यार्थः नहिअहमेवजीवामितुपुनः भवदर्पितवसनाशनमात्रजीवनाःसर्वे
प्राणिनः भवंतीतिशेषः सर्वप्राणिनांत्वमेवयोगक्षेमनिर्वाहकः भक्तानांयोगक्षेमनिर्वाहकइत्यत्र
किमुवक्तव्यं यद्वा जीवामितेतिमुख्यपाठे मात्रंकार्त्स्न्येवधारणेइत्यमरः भवतायत्अर्पितंमितंप
रिमितंवसनाशनमात्रं वसनाशनमेववसनाशन मात्रं यस्ययावदुपयुक्तं तेनसर्वेजीवाःप्राणिनःजी-
वंतिस्वस्यजीवनोपायंकुर्वंति इतरेभ्योयत्किंचिद्दातुमशक्ताः आधिकाभावादतस्तेषांसख्येनममजी
वनंनभवेत् तवसख्येनभवेदेव तवममसख्यमेवादौकथंइतिचेत् द्वासुपर्णासयुजासखायासमानंवृ
क्षंपरिषस्वजाते तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतिइतिश्रुतिप्रसिद्धमित्यर्थः॥श्री
राम तवसख्येनभजनेनयज्जीवनंतदेवजीवनमन्यदेवतासख्येनसेवनेनयज्जीवनंनतज्जीवन
मितितात्पर्यम् ॥१॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

ननुहेमूढ त्वामहंनपश्यामि तववाणींनश्रुणोमि त्वांनवेद्मि एवंसतिमेमेवानुकूल्यंकिमितिचेत्तत्राह
परितःपश्यसि हेरामचंद्रत्वंपरितःसमंतात्पश्यसि जगत्सर्वंपश्यसीत्यर्थः अभितःपरितःसमया-
निकषाहाप्रतियोगेपिद्वितीया परितः श्रृणोषि सर्वंश्रृणोषीत्यर्थः परितःसमंतात्जगद्विजानासि
सर्वंजगद्विजानासीत्यर्थः अपाणिपादोजवनोगृहीतापश्यत्यचक्षुःसश्रृणोत्यकर्णः॥सवेत्तिवेद्यंनतु

परितःपश्यसिपरितःश्रृणोषिपरितोजगद्विजानासि॥
मांरामकिंतदंतर्नश्रृणोषिनवीक्षसेनवावेत्सि ॥२॥ ७

तस्यवेत्तातमाहुरग्र्यंपुरुषंपुराणं इतिश्रुतेः हेरामएवंभूतस्त्वंतत्तस्मात्कारणादंतःश्रोत्रद्वारा अंतः-
करणेममवाणींकरुणारसयुक्तांप्रार्थनारूपांकिंनश्रृणोषिअपितुश्रृणोषीत्यर्थः यद्वातस्यजगतःविश्व २
स्यांतर्मध्येवर्तमानस्यमेवाणींसमानमन्यत् किंमांनवीक्षसेकिंनवेत्स्यपितवेत्सीत्यर्थः सर्वज्ञत्वादितिभावः
॥२॥

For Private And Personal Use Only

ननुलौकिकदृष्टांतेनत्वंमांजानासित्वामहंनजानामीतिचेत्तत्राह जानातीति भूपंसार्वभौममल्पः
दरिद्रःजानातीति अल्पंभूपःनजानातीत्येतत्तस्यउचितमुपपन्नंयोग्यंसकलमविज्ञेभूपेसर्वज्ञत्वा
भावादित्यर्थः सर्वज्ञेत्वय्यदःसकलमिदंकिंचिज्ञत्वंकथंश्लाघ्यंसकलानुसंधानंयोग्यमेवेतिभावः

जानातिभूपमल्पोनाल्पंजानातिभूपइत्येतत्॥उचितंसकलमविज्ञेसर्वज्ञे
त्वय्यदःकथंश्लाघ्यं॥३॥ अर्थिनिविलसतिलिप्सादातरिदित्सा तुदूर-
तोपास्ता॥आस्तांकृपणकथेयंरमापतेरामनोचिताभवति॥४॥ ॥

॥३॥पुनरपिलोकदृष्टांतमाशंक्याह अर्थिनीति अर्थिनियाचकेलिप्साबह्वर्थप्राप्तिरूपेच्छावि-
लसत्याविर्भवति दातरिदित्सातुदातुमिच्छातुदूरतोपास्ता दातरिदानेच्छानास्तीत्यर्थः लौकिक
दृष्टांतेतुसंभवतिकृपणत्वादितिभावः त्वयितुकृपणकथेयमास्तांनसंभवतिकुतः हेरमापतेइति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

सापेक्षंसंबोधनं लक्ष्मीपतित्वादेवौदार्यशक्तिगुणयुक्तेत्वयिनरूपणकथासंभवइतिभावः॥४॥
इदानींलौकिकदृष्टांतेनोपालंभयन्प्रार्थयति अपिरंकमिति रंकंदरिद्रंपितरमंकनिष्ठः उत्संगानि
न्ह्योरकइत्यमरः अर्भकःकिंचित्प्रियंप्रार्थयमानःस्वेष्टंप्राथितंतादृशादपिलभते इदंतुचित्रंगह

अपिरंकमंकनिष्ठःप्रार्थयमानोर्भकोल्लभेतेष्टं॥कष्टंबतजगदुद्भवभवदं
कगतोलभेनतद्भवतः॥५॥आशापाशनिबद्धंकारागारेकलेवरेनिहि-
तं॥यदिमोच्चयसिनमांत्वंकुरुतर्हिस्वात्मनैवमेवृत्तिम्॥६॥ ॥

नं कष्टंतुकृच्छ्रगहनेइत्यमरः यज्जगदुद्भवहेजगदुत्पत्तिकारण भवदंकगतोप्यहंममेष्टंभवत्प्रा-
प्तिलक्षणंभवतःनलभेतन्महदाश्चर्यमित्यर्थः॥५॥इदानींनियम्यनियामकभावेनप्रार्थनांकरो-
ति आशापाशनिबद्धमिति आशैवपाशआशापाशस्तेननिबद्धंबद्धंकारागारेकलेवरेनिहितं कारा-



For Private And Personal Use Only

गारे कारागारसदृशे कलेवरे शरीरे निहितं क्षिप्तं लोके यो ऽत्यंतापराधी तं बध्वा कारागारे क्षिपंति तद्दुः
खकारकत्वादित्यर्थः हे राम तस्मात्कलेवरलक्षणात्कारागारात्त्वं यदि न मोचयसि न निष्कासयसि तर्हि त्वा
त्मनैनेवमेवृत्तिं कुरुस्व स्वयमेव जीवनोपायं कुर्वित्यर्थः तव भजनानुसंधानेनैव मम जीवनं जीवनसार्थकता
यथा भवति तथा त्वमेव संपादयेति भावः॥६॥ पुनरपि प्रभुं उपालंभयति अनुचितमिति हे राम तावदि

अनुचितमिदमेवादो श्रीमद्द्वारि स्थितोऽप्यहं दीनः॥ व्यथयति कथं न हि त्वां मम वृ
त्तिस्तदनुमानवाधीना॥७॥ छ॥ इदमेवानुचितमेवादो किं तद्यच्छ्रीमद्द्वारि स्थितोऽप्यहं दीनः
सर्वसंपत्तिपरिपूर्णस्य भगवतः संनिधौ सेवकत्वेन स्थितोऽप्यहमनवाप्तकाम एवेति हे राम त्वत्सेवकस्या
पि मम तदनुमानवाधीना वृत्तिस्तदनु ईश्वरस्वरूपादनु हीना ये मानवास्तद धीना हीनेत्यनेन सूत्रेणानोः क
र्मप्रवचनीयसंज्ञायां तद्योगे द्वितीया मनुष्याधीनजीवनत्वं त्वां न व्यथयति कथं मम जीवनचिंतां न करोषीत्य
नुचितमिति भावः॥७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इदानींभगवतःसामर्थ्यकथनपूर्वकमुपालंभंकरोति त्रिभुवनपालनदीक्षितेति त्रिभुवनपालन-दीक्षितजगत्पालनसमर्थहेश्रीराम तवपालनविषयिणीयाशक्तिःसापीयमक्षताऽव्ययापूर्णेत्यर्थः हेप्रभोत्वंसमर्थः पालनेतवशक्तिरपिपरिपूर्णेत्येवंसत्यपिसामान्यमिवविशेषं यथासामान्यंपरि-हृत्यविशेषोगृह्यतेतद्वन्मांपरिहृत्यकिंसर्वतःस्फुरति तवशक्तिर्यथासामान्यविशेषशास्त्रयोःमा-

त्रिभुवनपालनदीक्षितरक्षणशक्तिस्तवाक्षतापीयम् ॥
सामान्यमिवविशेषंकिंमांपरिहृत्यसर्वतःस्फुरति॥ ८ ॥

सोसामान्यविहायविशेषशास्त्रमेवगृह्यते नहिंस्यात्सर्वभूतानीतिसामान्यशास्त्रंबाधित्वाऽग्नी-षोमीयंपशुमालभेतेतिविशेषशास्त्रमंगीक्रियते तद्वन्मांविहायसर्वतःस्फुरतिमांत्यक्त्वासर्वपालनं करोति यद्वासामान्यमिवविशेषं विशेषमित्याकाशमुच्यते विशेषमेकमाकाशंपरिहृत्यबहुत्वेगवादि ४

For Private And Personal Use Only

षुसामान्यंगोत्वंप्रसरतिसांख्येकुतस्त्वमेवमाक्षिपसिन्चेद्यस्मान्मांविहायसर्वेषांपालनंकरोतीत्यर्थः यद्वाविशेषंगवादिसमूहांतःपातिनंमामेकंपरित्यज्यसामान्यंगोत्व जातिः सर्वत्रस्फुरतिकिंनतर्हिकुतोनपासीत्यर्थः॥८॥ ननुत्वमपराध्यसिअतस्त्वंवोपेक्षेतिचेत्तदर्थंवदति यदीति यदिपु

यदिपुनरपराधानांकोटिभिरंतर्विषादमायासि ॥पत्ता-
डितापिबालैरुष्यतिकिमितीहमानुषीजननी ॥९॥

नर्ममापराधानामविनयानांकोटिभिःसमूहैःअंतर्विषादंमनसिकोधंसमायासिनेदमुचितंतवदयालुत्वादित्यर्थः हेरामप्राकृतलोकेपि बालैःजननीपत्ताडितापिपादाहतापिकिंरुष्यतिअपितुबहुशःतुष्यतिकृपाभरेणस्तनपानादिकारयत्येवमानुषीसती त्वंतुदेवोसीत्यतउपेक्षाकरणंत्वयिनोचितमितिभावः॥९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

इदानींत्वस्मिन्नपराधत्वमंगीकृत्याहममकोवापराधःइति अयीति हेराघवतथ्यंवदसत्यंब्रूहि तवा यंकोपःनिर्दयत्वव्यंजकलक्षणःकेनमदपराधेनेतिवद हेदाशरथे तवदशरथपदयोःशपथःयदिस त्यंनवदसिवाअन्यथावदसितवकोप्यपराधोनास्तीत्यन्यथावादोनकर्त्तव्यइतिभावः मातृर्वसिष्ठादि

अयिवदराघवतथ्यंकोपोयंकेनमदपराधेन॥शप-
थस्तेदाशरथेदशरथपदयोर्यदन्यथाब्रूषे ॥ १० ॥

गुरून्परिहृत्यदशरथपदयोरेवशपथःकिमितिचेत् मातॄणामाज्ञामथगुरूणांवसिष्ठादीनामाज्ञा मनंगीकृत्याऽत्यादरेणपितुर्दशरथस्यैवाज्ञायाःस्वीकृतत्वात्पुत्रधर्मेपरिनिष्ठितोजीवतोवाक्यकरणमि त्यादिरूपेगुर्वर्थेत्यक्तराज्योदशरथस्यार्थेसंत्यक्तराज्यादिवैभवोरामस्तच्चरणयोःशपथेदत्तेनानृतंवदि

For Private And Personal Use Only

घ्यतीत्याशयेनेत्यर्थः लोकेपिपुत्रस्यपितुःशपथव्यवहारःप्रसिद्धः ॥ १० ॥ इदानींसर्वात्मकत्वात्तद
यालुत्वाच्चममक्लेशान्दृष्ट्वादयाऽवश्यंकर्त्तव्येतिप्रार्थयति मामिति हेश्रीरामेहास्मिन्संसारेमांकृपण
मनाथंदरिद्रमनन्यस्थापितंक्लेशैर्व्याप्तं क्लेशास्तुयोगशास्त्रोक्ताअविद्याअस्मितारागद्वेषाभिनिवेशाः
पंचतेर्व्याप्तंचितं रमेशरमापते कथंभूतैःक्लेशैःनिःशेषैःसमग्रैःकिंभूतंमांलोलद्भुजपदमस्तकंसाष्टांगप्र-

मामिहकृपणमनाथंक्लेशव्याप्तंरमेशनिःशेषैः ॥ लोल
द्भुजपदमस्तकमवलोक्यकथंस्थितोसितूष्णींत्वं ॥११॥

णमंतमित्यर्थः एतादृशंमामवलोक्यकथंस्थितोसितूष्णीं दयानिधेरिदंतवनोचितमितिभावः॥११॥
ननुमयिदयालुत्वंकुतोआगतमित्याशंक्याह करुणाकरइति हेरामकरुणाकरइत्याद्याविरुदमाला
लक्षणमालाःलक्षणसमूहाः दीनदयाकरइतिपुराणप्रसिद्धास्ताःसर्वाःरथैःरथादिवाहनैर्नोपयांति

वाहयितुमशक्यास्तासांबहुत्वादितिभावः अतःशरणागतमतिकृपणं स्वरूपानभिज्ञंयोवागार्ग्येत
दक्षरमविदित्वास्मा ल्लोकात्प्रैतिसकृपणइतिश्रुतेः अत्यंतदरिद्रमेतादृशंमांहेरघूत्तंसरघुकुलभूषणकिंस
मुपेक्षसेउपेक्षांकरोषीति ॥१२॥ करुणादिलक्षणानांबाहुल्या च्छ्रुतिस्मृतिपुराणगीतत्वाच्चमयिकरुणा

करुणाकरइत्याद्यानरथैरुपयांतिबिरुदमालास्ते॥शरणागतमतिकृप-
णंकिंमांसमुपेक्षसेरघूत्तंस॥१२॥कुरुवाराघवकरुणांमयिदीनेत्वांशर-
णमापन्ने॥शरणागतवत्सलइतिविष्टपगीतंजहीहिवाबिरुदम् ॥१३॥

वश्यंकर्त्तव्येतिप्रार्थयति कुर्विति हेराघवयस्मात्त्वमेवंभूतस्ततोमयिदीनेऽनाथेकरुणांकुरु किंविशे
षमयित्वांशरणमापन्नेशरणागेतकरुणांनकरोषिचेच्छरणागतवत्सलइतिविष्टपगीतंबिरुदंवेदादिभि
स्त्कतंजहीहित्यजेत्यर्थः होहाकृत्यागेअस्माद्धातोर्लोटि आचहावितिसूत्रेणजहीहिरूपत्रयम् ॥१३॥



For Private And Personal Use Only

इदानींत्वयैववाच्यंसेवांविनामयाकस्यापिकिमपिनदीयतइतिचेत्तदर्थंवदति सेवामिति सेवाम
पेक्ष्यदातासेवांगृहीत्वाददातिसदातानभवतिकिंतुवेतनादाता वेतनंनामयस्ययादृशीसेवातामपे
क्ष्यतस्यतावद्धनादिदानमितिवेतनशब्दार्थः तस्माद्दातृत्वंकिंनामेत्याकांक्षायांवदति सेवाहीनेति
सेवाहीनेदीनेसेवारहितेअनाथेयःददातिसदाता तत्रदृष्टांतः यथापल्वलेअरवातात्पसरोवरेसेवा

सेवामपेक्षदातानहिदाताकिंतुवेतनादाता ॥ सेवाही
नेदीनेपल्वलइवदेहिजीवनंघनवत् ॥ १४ ॥ ❀

हीनेकृशेपिघनःजीवनंप्रयच्छति तद्वत्त्वापिममसेवामनपेक्ष्यैवकृपाविधेयेतिभावः॥१४॥ ❀
स्वामिभिरेवंवक्तव्यंतवपूर्वजैःसेवयैवमत्तःकिंचित्प्राप्तमितितवापिसेवापेक्ष्यतेःतोवदति से-
वकवंशभवत्वादिति सेवकवंशभवत्वादपेक्षसेसेवांमयाकृतांसेवकवंशजोहं इतिमत्कृतांसेवांप्र-

तीक्ष्से त्वयि तन्नयोग्यं कुतः यतोऽलसमपि सेवां कर्त्तुमयोग्यमपि सेवकस्कृतं पृथ्वीशा महाराजानः ता
दृशमपि परिपालयंति रक्षंति भो राघव त्वं तु त्रिभुवने शोसि त्वया त्ववश्यमेवाहं पालनीय इति भावः ॥१५
हे रामचंद्र मत्पूर्वजैः स्वोदरपूरणार्थमेवनाराधितोस्यपि तु संततिरक्षणार्थमपीत्याह नहीति नहिनि

सेवककवंशाभवत्वादपेक्षसे चेन्मया कृतां सेवां ॥ अलसं सेवकस्कृतमपि राघव परि
पालयंति पृथ्वीशाः ॥१५॥ नहि निजजाठरवन्हेर्जयाय मत्पूर्वजार्जितोसि त्वं ॥ किं-
त्वज्ञालससंततिसंततपीडापरंपराशांत्यै ॥१६॥ ७ जजाठरवन्हेर्जयाय मत्पूर्वजार्जि

तोसि त्वं निजः स्वकीयो जाठरवन्हिर्वैश्वानरः तस्य जयायान्नपानादिना तृप्त्यर्थं मत्पूर्वजैर्मम पित्रादिभिर्नो
पार्जितोसि नाराधितोसि किं त्वज्ञालससंततिसंततपीडापरंपराशांत्यै अज्ञाऽलसा च या संततिपरंपरा त
स्याः या संततं निरंतरं पीडाऽशनवसनादिकृताधिस्तस्याः शांत्यै तन्निवारणार्थमित्यर्थः ॥१६॥ ७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोदयानिधेत्वयियत्काठिन्यंमद्विषयकंतदेवममाश्चर्यवद्भातीत्याह चित्तेति चित्तचमत्कृतिकार णंममचित्तेचमत्कृतिकारणमाश्चर्यकारणंकिंतदित्याह इदमेवेहतावत्कारणंयन्मद्विषयकंभव- त्कश्रीमत्कककाठिन्यंनिर्दयत्वंनतुत्वयैवंवक्तव्यंमयिकाठिन्यंनास्तीतितदनुतर्हिसेवकलोकेस्व

चित्तचमत्कृतिकारणमिदमिहतावद्भवत्ककाठिन्यम्॥
तदनुचसेवकलोकेलोकेशकथंकठोरतांयासि॥१७॥

भृत्यादौमद्रूपेहेलोकेशत्रिभुनपतेकिमितिकठोरतांयासिनिर्दयतांगच्छसिएतन्त्वयिसर्वेश्वरे नोचितमितिभावः॥१७॥ इदानींत्वंममजनकोस्यहंतवबालोस्मिइतिमत्वाममेप्सितंदेहीतिप्रा र्थयति अंकइति भोप्रभोतवांकेतवोत्संगेकिंभूतेउत्संगेगतपंकेअत्यंतनिर्मलेपोष्यमासीनं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थितंशिशुंपाहिरक्षय हेलं केशारिपोशत्रुध्नकथंभूतंशिशुंत्वन्मुखसौरभचर्चिततांबूलाशंभवन्मु
खसौगंध्यसुरभियस्तांबूलःतस्याशाविद्यतेयस्यतंतांबूलाशं ॥१८॥ इदानींजननीरूपत्वेनस्तौति
चुबुकमिति हेसिंदूराचलवासिनिरामाभिधेमातःपाहिस्वार्भकंमां सिंदूराचलवासिनीनामारूणाच

अंकेतवगतपंकेलंकेशारिपोतिपोष्यमासीनं॥ त्वन्मुखसौरभचर्चिततांबूला
शंशिशुंप्रभोपाहि॥१८॥ चुबुकंसन्मुखतायैकरेणकर्षतमर्भकंमातः॥सिं
दूराचलवासिनिमामिहरामाभिधेपाहि॥१९॥ ७ ॥

लवासिनीत्यर्थः यद्वा-
सिंदूराचल वासिनीरामक्षेत्रवासिनीतत्रत्योभूधरः सिंदूराचलनाम्नाऽतिप्रसिद्धः कथंभूतंअर्भकं
त्वसन्मुखतायैमातुश्चुबुकंमुखस्याधोभागंकरेणकर्षंतंबालानांस्वभावएवैषःयन्मातास्वसन्मु-
खंनपश्यतिचेत्स्वकरेणस्वाभिमुखीकरणंस्वाभिमुखीकर्तुंमुखस्यक्रियते॥१९॥ ७

ननुजगदीश्वरेऽधृष्यमर्थितवधृष्यतायोग्येत्याशंक्याह उचितेति उचितात्यधृष्यताउचितायो ग्यात्यधृष्यतानामनिकटेस्थित्वासंभाषणादिकरणाभावः साधृष्यता प्रत्यर्थिनृपेषुसामंतेषुप्र तिद्वंद्वेषुयोग्याउचितानार्भकेपोष्यमप्युचिता तथाहि वत्सलताधृष्यतयोःसहावस्थानमनुचि-

उचितात्यधृष्यतातेप्रत्यर्थिनृपेषुनार्भकेपिमयि॥व
त्सलताधृष्यतयोर्गोव्याघ्रस्येववर्त्ततेवैरम्॥२०॥

तंगोव्याघ्रयोरिववैरभावात्वात्स्यल्ययोग्यमप्यधृष्यतानसंभवतीति॥२०॥ इदानींजीवि कदृष्टांतेनानुवदति पितराविति हेरामयत्रपितरौजननीजनकौविभिन्नौतत्रान्यतरेणजन- न्याजनकेनवाशिशोर्जीवनंपालनंभवति ममनूभयंमातापितृरूपंत्वमेवएवंसतित्वंचेन्नि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्करुणोभवसितर्हिमयाकिंकर्त्तव्यंकस्याग्रेवक्तव्यमितिभावः॥२१॥ इदानींसर्वज्ञत्वात्करुणानिव
चनानिममनश्रृणोषीत्यपिवक्तुंनशक्यतइत्याह नश्रृणोषीति दीनभाषांकरुणावाणींनश्रृणोषिना
कर्णयसीत्यपिवक्तुंनशक्यते सर्वज्ञत्वात् ननुतर्हिश्रुत्वातूष्णींस्थितो सीतिवाच्यंतदपिनसं-

पितरौयत्रविभिन्नौतत्रान्यतरेणजीवनंहिशिशोः॥उभयंत्वमेवमेतत्त्वयि
निष्करुणेकरोमिकिंराम॥२१॥नश्रृणोषिदीनभाषामितिसर्वज्ञेनशक्यते
वक्तुम्॥श्रुत्वास्थितोसितूष्णीमित्यपिवचनंदयानिधेर्निंद्यम्॥२२॥

भवतीत्याह श्रुत्वेति श्रुत्वासमाकर्ण्यस्थितोसीत्यपिवचनंदयानिधेकरुणासमुद्रेत्वयिनिंद्यमयोग्यंकरु
णावंतईश्वराःदीनभाषांश्रुत्वातूष्णींनतिष्ठंतिकिंतुउपकुर्वंतीतिभावः॥२२॥ ५



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु दयालवोपिप्रभवोन्यव्यासंगासक्तात्युन्यवचनानिनाकर्णयंतीत्याशंक्याह किमिति हेजा-
नकीजानेजानकीजायायस्यसजानकीजानिः जायायानिङ्सूत्रेणनिङ् किंवातद्गुरुकार्यय-
द्व्यासंगेनयत्रासक्तत्वेनमेममदीनानिवचनानिप्रकटंस्फुटंतवकर्णपथेनायांतिनप्राप्नुवंतिमह-

किंवातद्गुरुकार्ययद्व्यासंगेनजानकीजाने॥ दीनानिमेव
चांसिप्रकटंनायांतिकर्णमार्गंते॥ २३॥ ॥

त्कार्यव्यासंगेनममभाषांनश्रृणोषीत्यर्थः ॥२३॥ इदानींयुद्धादिनाश्रांतत्वेननश्रृणोषीत्याश-
येनाह प्रायइति हेरामप्रायोबहुधैवंलक्ष्यते राक्षसयुद्धे अत्यंतंश्रांतत्वात्क्षेषअनंतपर्यंकेसु-
खंयथास्यात्तथाशेषेनिद्रितोसि ननुनिद्रितोसीतिकिमित्यारोप्यते अतआह यतोयस्मात्का-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रणात् भृशं जल्पतो मेऽत्यर्थं वदतो मे मम करुणानि वचांसि नावधारयसि नाकर्णयसि ततो लक्ष्यते लोके यो ह्यत्यंतश्रमवशात्क्लांतो भवति स किमपि न जानाति न शृणोतीति भावः॥ २४॥ इदानीं वचनानामत्यंतकरुणामयत्वात्तानि श्रुत्वा अचेतना अपि द्रवंतीत्याशयेनाह अपीति अपिदलति

प्रायो राक्षसयुद्धे श्रांतः शेषेऽनिशं स्करवंशेषे॥ यज्जल्पतो भृशं मे करुणानि वचां
सि नावधारयसि॥२४॥ अपिदलति वज्रहृदयं मद्वचनै रोदतीव पाषाणः॥
किं वा मया पराद्धं यत्करुणाब्धिर्भवानुदासीनः॥२५॥ ❀ ॥

वज्रहृदयं मम करुणावचनैर्वज्रांतरमपि दलति विदीर्णं भवति पाषाणोऽपि रोदतीव रोदनं करोतीव यद्यपि वज्रपाषाणादीनां दलनरोदनेन संभवतस्तथाप्यत्यंतकरुणावशादपि भवत एवेत्यर्थः हे राम एवंभूते मयि करुणाब्धिरपि भवानुदासीन इति महदाश्चर्यमिति भावः॥ २५॥ ❀



For Private And Personal Use Only

इदानीमनन्यसेवकंकरुणावचनानिजल्पंतंत्वयाऽविगणितंमांलोकाउपहसंतीत्याशयेनाह जल्पंतमिति जल्पंतंवारंवारंकरुणाव चांस्युदीरयंतमल्पबुद्धिमज्ञंमांत्वत्कृपामपश्यंतःमयित्वत्क पापांगमपश्यंतःलोकास्थूलबुद्धयःउपहसंतिउपहासंकुर्वंतिमांपश्यंतःसंतः हेशोकारेरामशोका-

जल्पंतमल्पबुद्धिंपश्यंतस्त्वत्कृपामपश्यंतः॥ मामुप
हसंतिलोकाःशोकारेरामतन्नवाश्लाघ्यम् ॥ २६ ॥

पहरणसमर्थरामचंद्रतन्नवश्लाघ्यंयोग्यंनभवतिशीघ्रमेवस्वकीयकृपाकर्त्तव्येतिभावः॥२६॥ इदानीमयंदाम्भिकोभवतीतिश्रीरामोऽनुग्रहमेतदुपरिनकरोतीतिलोकःशंकतेइत्याशयेनाह क्षी रेणेति क्षीरेणदग्धजिव्हःउष्णक्षीरेणज्वलितजिव्हःपामरजनःशीतलंतक्रमपिफूत्कृत्यपिबति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धवलिमासाम्यात्तन्न्यायेन दंभिनं जनमवलोक्य मामपि दंभिनं लोकः शंकते तर्कयति किंभूतं मां त्व
यात्यक्तमननुगृहीतं तवानुग्रहाभावादयमपि दांभिकभक्त इत्याशंकास्पदमितिभावः॥ २७॥
इदानीं करुणामृदुभावान्नायं परकीय इति प्रार्थितं न प्रयच्छसि चेन्मा प्रयच्छ स्वामिसेवकभावेनत्वं

क्षीरेण दग्धजिह्वस्तक्रं फूत्कृत्य पामरः पिबति॥ दंभिनमवलोक्य जनस्तद्वन्मां शं
कते त्वयात्यक्तं॥ २७॥ मयि करुणामृदुभावाद्यदि नाभीष्टं करोषि मा कुरु तत्॥
स्वस्वामिभावमीश स्वीयं प्रकटीकुरुष्व मा कुरु तत्॥ २८॥ ७ श्यमभीष्टं देहीति प्रार्थय

ति मयीति करुणामृदुभावादपि यदि मयि नाभीष्टं करोषि स्वाभिलषितं न प्रयच्छसि मा प्रयच्छ मत्स्वा
भीष्टं हे ईश प्रभो तर्हि स्वस्वामिभावं स्वामित्वं प्रकटीकुरुष्व ईशेति संबोधनं राज्ञां स्वामित्वद्योतनार्थं अस्मिन्पद्ये स्व ११
स्वामिभावमित्यत्र स्वस्मिन्स्वामिभावः स्वस्वामिभाव इति नो चेत्स्वीयमिति पदेन पुनरुक्ततादोषः समायाति॥
॥ २८॥

इदानींस्वस्मिन्दोषारोपंस्तोति ननुमन्मंत्रजपएवतवाभीष्टंदास्यतिकिंमत्प्रार्थनयेतिचेत् पायसइति हेरामचंद्र यथापायसेपायसान्नेक्षिप्तंसर्पिःपुष्ट्यादिकार्यंकरोति तथाभस्मनिनिहितंक्षिप्तंसत्किंनामकरोतिनकिमपिकरोतीतिवैधर्म्येदृष्टांतइत्यर्थः तद्वत्तवमंत्रजपःतवनामस्मरणंपापिनिमयि

पायसइवरामसर्पिर्भस्मनिनिहितंकरोतिकिंनाम॥ तद्व
त्तवमंत्रजपःपापिनिमयिकिंकरोतिवाभीष्टम्॥ २९॥

किंवाभीष्टंप्रार्थितंकारोतिनकरोतीत्यर्थः॥२९॥ हेमूढममनामनीरंतवदोषाख्यंवन्हिंप्रशमयिष्यतिएवंचेत्तत्रपुनरपिस्वकीयदोषाविष्करणमेवकरोति संतप्तेति संतप्तायसपिंडेप्रतप्तलोहपिंडेवार्यपिजलमपिक्षिप्तंसत्भस्मीभवतितद्वन्नित्याशौचेनित्यंमलिनेमयित्वन्मंत्रजपोपिभस्म

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साद्भवतिभस्मश्चायंभवतिमंत्रस्यतुभस्मनसंभवतिनित्यत्वात्तथापिशऋद्धतालक्षणकार्यप्रतिबंधएवा 
त्रलक्षणीयः॥३०॥इदानींहेरामत्वयाइदंयद्वक्तव्यंममनामजपोलौकिकःक्षारस्तद्भावनातोनष्टप्र
तिबंधकपापमलेतवाभीष्टसिद्धिरतोमन्मंत्रजपएवकर्त्तव्यइतिन्चेत्तापरूपएवाहंतस्मिन्मयिमं-

संतप्तायसपिंडेवार्यपिभस्मीभवत्युपक्षिप्तं॥ नित्याशौचेतद्वन्मयिमंत्रज
पोपिभस्मसाद्भवति॥३०॥ मालिन्यदोषभीत्यापृथग्विधेयंनुमाषराशेः
किं॥मन्त्तःशरीरपापात्तापंकिंवाजपःकरोतिपृथक् ॥३१॥

त्वजपोमालिन्यंकिमपाकरिष्यतीत्याशयेनाह मालिन्येति मालिन्यदोषभीत्यामालिन्यत्वभयेन
माषराशेर्मालिन्यंश्यामत्वंकिंदूरीकर्त्तव्यं स्वभावसिद्धंतुदूरीकर्त्तुंनशक्यतेतद्वन्मंत्रःमत्सकाशात्तृशा 
रीरसकाशात्तृशरीरपापात्तापंतवजपःकिंपृथक्करोतिनकिमपिपृथक्कर्त्तुंशक्नोतीतिभावः॥३१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननुत्वंदोषान्वदसिकिमित्याचरसितत्रेदानींपापिष्ठःपापंनकर्त्तव्यमितिलोकसमक्षंवदन्नपिकरो
तिएवंसदृष्टांतमाह कुर्वित्ति कुरुमासाहसमित्थंजल्पन्साहसंनकर्त्तव्यमितिजल्पन्नुवदन्पक्षीप
क्षिविशेषःस्वयंपाषाणंभिनत्त्येवविदारयत्येवजातिस्वभावात्तद्वत्पापंनिंदामिपापंकुत्सितमि

कुरुमासाहसमित्थंजल्पन्पक्षीभिनत्तिपाषाणं॥तद्वत्स
हजैर्दोषैःपापंनिंदामिरामकुर्वेच॥३२॥ ❀

तिवदामिकरोमिचैवचदुष्टस्वभावात्रामत्वयामद्विषयेकिंकरणीयमित्यर्थः॥३२॥ ननुचंदनतरु
संसर्गेअचंदनोपितरुश्चंदनोभवतितथामन्मंत्रजपा दिनामसंसर्गेअदोषःस्यादेवतिचेत्स्वभाव
सिद्धदोषाअपरिहरणीयाःप्रयत्नशतैरपीत्याशयेनाह मृगमदभूमाविति मृगमदभूमौजनितःकु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तूरिकालवालेसमुत्पन्नःपलांडुःदुर्गंधिःकंदविशेषःस्वकीयंदोषंदौर्गंध्यलक्षणंनजहातीत्यर्थः हेदे
वेशरामभद्रतवदासोप्यहंजातुकदाचिदपिस्वकीयंदोषंनत्यजाभिजातिस्वभावादित्यर्थः॥३३॥इदा
नींअत्यंतंपापिष्ठश्चेत्तर्हिप्रायश्चित्तादिनातवशुद्धिर्भविष्यतीतितदपिनसंभवतीत्याह सुकृतिन

मृगमदभूमौजनितोजहातिदोषंनिजंपलांडुःकिं॥तद्वत्तवदासोहंत्यजा
भिदोषंनजातुदेवेश॥३३॥सुकृतिनईषत्पापप्रायश्चित्तंरघूत्तमप्रोक्तं॥
अपयातिमामुदीक्ष्यप्रायस्तदपीहगोरिवव्याघ्रम्॥३४॥ ॥

इति सुकृतिनःबहुपुण्यवतःपुरुषस्येषत्पापेसमुत्पन्नेतत्परिहारार्थंशोधवप्रायश्चित्तंप्रोक्तंविहितंशास्त्रे-
णेत्यर्थः हेरघूत्तमतदपिप्रायश्चित्तमपिमामुदीक्ष्यावलोक्यापयातिदूरतःप्रयातिशंकितंकार्यंनक-
रोतिमदीयपापस्यमहत्त्वादित्यर्थः व्याघ्रंदृष्ट्वागोरिवगौर्यथादूरंपलायेततद्वदित्यर्थः॥३४॥



For Private And Personal Use Only

ननुपापसंख्याकंप्रायश्चित्तंविधेयंततःसर्वपापापगमेसतिकृतार्थःस्यात्इतिचेत्पापसंख्यैवनावग
म्यतइत्याह परिगणनेति भगणानांनक्षत्राणां नक्षत्रमृक्षंभंतारे त्यमरः परिगणनासंख्याऽथच
परमाणूनांसमंततःसर्वेषांगणनाभवितापविष्यतिपरंतुहेराममत्कृतानांपापचयानांपापसमूहा-

परिगणनाभगणानांभवितायदिवासमंततोणूनां॥राघवपापचयानांनमत्कृता
नांभवेदियंक्वचन॥३५॥सर्वज्ञताश्रुतातेसत्यंवदरामकिंकरोहंते॥मत्कृतदु-
ष्कृतसंख्यांयथार्थतोवेत्सिकिंनवावेत्सि॥३६॥ छ॥नामियन्ताक्वचनकदापिनभवे

त्तेषांअपरिमितत्वादितिभावः॥३५॥इदानींरामचंद्रंप्रतिपृच्छति सर्वज्ञेतेति हेराम तेतवसर्वज्ञताश्रुतास
र्वज्ञत्वंयःसर्वज्ञःसर्वविदित्यादिश्रुतिष्वपिश्रुतमतोसत्यंवदाहंतवकिंकरोस्मीतिकारणात्सत्यंवक्तव्यं
सर्वज्ञत्वात् मत्कृतदुष्कृतानांसंख्यांयथार्थतोवेत्सीतिसत्यंवक्तव्यमित्यर्थः॥३६॥ छ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदानींकिंबहुप्रार्थनयास्वामिभिःसर्वथापालनीयएवाहमितिप्रार्थयति अपराधिनमिति हेरघूत्तंस
रघुकुलभूषण अपराधिनमितिसंभ्रमेणप्रवृत्तोयथेष्टंप्रयोगोन्यायसिद्धःइतिवचनात्संभ्रमेऽपरा
धमितिअनेकधाप्रयोगइतिबोध्यंयथासर्पःसर्पस्तद्वत्सर्वथाअपराधिनमर्भकंबालंपालयेत्यत्रापि

अपराधिनमपराधिनमपराधिनमर्भकंरघूत्तंस॥पा
लयपालयपालयजननिश्रीरामनार्थयेकिंचित्॥३७॥

पूर्ववत्संभ्रमेणैवजननिश्रीरामान्यत्किंचिन्नार्थयेनप्रार्थयामिअत्रजनकस्थानेजननीतिपरमत्यं
तवात्सल्यद्योतनार्थम्॥३७॥इदानीमहमनाथइतिसनाथइतिवावक्तुंनशक्नोमीत्याशयेनाह
उचितमिति हेरामाहंत्वयिनाथेसतिस्वामिनिविद्यमानेअनाथइतिवचनंवक्तुंवदितुमुचितमितियो-



For Private And Personal Use Only

ग्यंनहियोग्यंनभवत्यभद्रममंगलत्वात् हे सीता नाथत्वयोपेक्षितोहमितिकृत्वासनाथइत्यपिवक्तुं
जिन्हेभिलज्जायुक्तोभवाम्युभयथापिवक्तुमसमर्थइत्यर्थः॥३८॥ इदानींगवादिपशरपिक्रोशंतंस्व
वत्संप्रतिवात्सल्येनशीघ्रंसमुपयातिइत्याशयेनाह क्रोशंतमिति क्रोशंतंदीर्घस्वरंकुर्वंतंदीनास्यं

उचितंवक्तुमभद्रंनहिनाथेत्वय्यनाथइतिवाक्यं॥ जिन्हेम्युपेक्षितोहंसीता
नाथत्वयासनाथइति॥३८॥ क्रोशंतंदीनास्यंपशरप्युपयातिगोर्निजंवत्सं॥
ईदृग्मदीयभाग्यंसर्वविदपिवेत्तिमत्कृपांनभवान्॥३९॥ ॥

म्लानवदनंनिजंस्वीयंवत्सं प्रतिपशरपि पशयोनिरपिगोर्गवादिःसमुपयातिसमीपमुपसर्पति हे
राममदीयंत्वीदृग्भाग्यंयत्सर्वविदपिभवान्मत्कृपांमयिकरुणांकर्तुंनवेत्तिनजानाति॥३९॥ ७

॥ ७॥ ॥७॥ ॥७॥ ॥७॥ ७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदानींसर्वज्ञत्वादिगुणसंपन्नोपिभवान्मयिकिमितिकाठिन्यंकरोषीतिप्रश्नेकिमुत्तरंतवेत्याशयेनाह
सर्वज्ञइति सर्वज्ञःसर्ववेत्तास्वाधीनःअपरतंत्रःदयालुःकृपासिंधुरेवंभूतोपिभवान्मयिकथंकठिनो
ऽकृपावान्इत्यभिधेहिवदइतिमयात्वंपृष्टश्चेद्रामेश्वरत्वंविनाममोत्तरंप्रत्युत्तरंकिंदास्य सीश्वरोहं

सर्वज्ञःस्वाधीनोदयालुरभिधेहिमयिकथंकठिनः॥इति
पृष्टोदास्यसिकिंविनेश्वरत्वंममोत्तरंराम॥४०॥ ॥

स्वेच्छाचारीकस्योपरिकृपांकरोमीकस्यचिदुपरिनकरोमीतीश्वराणांस्वभावएवैषःयत्स्वेच्छाचारि
त्वमितितवोत्तरंनान्यदितिभावः॥४०॥ नन्वपराधिनिमयिकृपांनक्रियतेइतिचेत्तवयावंतोभक्ता
स्तेसर्वेपिसंसारिणएवसंसारिणांत्ववश्यमपराधोभवत्येवंसतिकस्योपरिकृपानोचितेत्याशयेनाह १५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपराधइति अपराधमार्गणेपिअपराधपरामर्षणेसतिकचिदपिकस्मिन्नपिसंसारिणिभक्तेपितव करुणानैवउचितासंसारित्वादित्यर्थः यतोनहिकश्चित्संसारीगतापराधोनामाकृतापराधस्तवव- ल्लभेष्वपिकृपापात्रेष्वपिअस्तिकोपिनास्तिसंसारित्वादितिभावः॥ ४१॥ ननुयदुपरिकृपाक्रियते

अपराधमार्गणेपिकचिदपिकरुणातवोचितानैव॥नहिकश्चित्संसारी
गतापराधोस्तिवल्लभेषुतव ॥४१ ॥तस्यस्वल्पोपराधोममपुनरधिकः
प्रमाताकः॥अहमितित्वदभ्यस्तास्त्वयेशसर्वज्ञतेतदर्थंकिम् ॥४२॥

तस्यतुस्वल्पोपराधः बव्हपराधइतिहेतोस्त्वयिकृपानविधीयतइत्याशंक्याह तस्येति तस्यत्वयायुक्त स्यस्वल्पोपराधोममपुनरधिकःउत्कृष्टःप्रमाताकःकोवासाक्षीनकोपीत्यर्थः ननुत्वयैवंवक्तव्यमहमेवसा क्षीतिसर्वज्ञत्वादितिचेदीशभोरामतर्हित्वयैवस्वेनैवतदर्थंकिंस्वस्यसर्वज्ञताभ्यस्ताप्रनःप्रनरुक्तेत्यर्थः॥ ॥४२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ननुसापराधेषुममदयाकुतस्त्वया दृष्टेतिस्वामिभि र्वक्तव्यंचेत्सापराधेष्वपिअनुग्रहोदृष्टइत्यत्राह अ ग्रजइति अग्रजजायांज्येष्ठभ्रातृस्त्रियमिच्छतिवांछतिसुग्रीवेकिंलक्षणेपुनरग्रजवधलालसांतरा त्मनिअग्रजवधेवालिवधेलालसोलुब्धोंतरात्माबुद्धिर्यस्येत्येवंभूतेनिषिद्धकर्मकारिण्यपिसुग्रीवेराघ

अग्रजजायामिच्छत्यग्रजवधलालसांतरात्मनिच॥या
करुणासुग्रीवेराघवस्यातेकथंतरामुचिता॥४३॥ ॥

वस्यातेप्रसिद्धाकरुणाअतिशयेनकथंतरांअतिशये तरप्उचितातस्मात्त्वयासापराधेष्वनुग्रहः क्रियतइतिभावः॥४३॥पुनरपिसापराधानुग्रहंदर्शयति भ्रातुरिति भ्रातुरवज्ञामात्राद्भ्रातुःरावण स्यावज्ञामात्रादपमानमात्रात्सितैवैरवह्निनेवपितवैरवह्निस्तेनेवजवाद्वेगात्सितवैरंवह्निरूपंदःस



For Private And Personal Use Only

हत्वादित्यर्थः अपमानाद्धेतोःसत्रेतिपदमव्ययंसहार्थवाचकंपितृवैरवन्हिनासहेतियोज्यं ज्येष्ठो भ्रातापितुःसमः पित्रारावणेनसाकंयद्वैरंतदेववन्हिस्तेनपितृवैरवन्हिनासाकमेवंस्वसमीपमागते शरणागतत्वेनप्राप्तेअस्मिन्बिभीषणेकृपाकृतातस्मिन्क्वास्तिनिरपराधत्वंनिर्दोषत्वंकुत्रास्तिनास्ति

भ्रातुरवज्ञामात्रात्सत्रापितृवैरवन्हिनेवजवान्॥स्वस
मीपमागतेस्मिन्बिभीषणेक्कास्तिनिरपराधत्वं॥४४॥

॥४४॥ इदानींक्लेशवशात्परदोषाविष्करणंमयाकृतमितिमयिनिंदकत्वंनारोपणीयमित्याह जल्पतीति किंचिदुच्चैःजल्पतीतिप्रलापंकुर्वतीतिमयिपौरोभाग्यं दोषैकदृक्पुरोभागीत्यमरः दोषैकग्राहिहृदयःपुरोभागीतिकथ्यतेइतिकृत्यस्यपुरःअग्रेप्रथमदोषमेवभजतेसपुरोभागीतस्य

पुरोभागिनोभावःपौरोभाग्यंपरदोषैकदर्शित्वमितियावत् उत्तमैःश्लोक्यतेस्तूयतेसतथायद्वा उद्गतं तमोअज्ञानंयस्मात्सउत्तमाअज्ञाननिवर्त्तकःश्लोकःकीर्तिर्यस्यतथा पद्येयशसिचश्लोकइत्यमरः॥ संतमइतिहेतुपंचम्यंतंसंतम चित्तहेतुकं पौरोभाग्यमितिमाकल्पयेत्यन्वयःपुरजोभावःपौरोभाग्यं

जगुतिकल्पयमोच्चैःपौरोभाग्यंमयिक्षमासिंधो॥संतम
चित्तभावादुरुक्तमुक्तंयदुत्तमश्लोक॥४५॥ ॥

श्रेष्ठत्वव्यंजकंनिंदकत्वंमाकल्पयहेक्षमासिंधोतर्हित्वंकुतएवंजल्पसीतित्वयानवाच्यमित्याशयेनाह संतमचित्तइति हेरामसंतमचित्तभावादुःखितचित्तभावाद्दुःखितचित्तत्वाद्यदुक्तंतत्दुरुक्तमसाधूक्तं यःसंतमचित्तोभवतिसतुसाध्वसाधुवदत्येवेतिभावः॥४५॥ ॥७॥ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदानीं परेषां दोषोद्घाटनेन स्वस्मिन्निंदकत्वं समायातीति तन्मास्त्विन्त्याह अस्तामिति आस्तांतिष्ठतुप
रोक्षेऽसमक्षं परदोषगवेषणं परदोषोद्घाटनमसभ्यं निंद्यमतो न कर्त्तव्यमित्यर्थः ईदृशि भवतश्चरितेऽ
योग्येपि कृपाकरणरूपे सति बिभीषणाद्यैर्मम किमपराद्धं को वापराधः कृतो यन्मया तेषां दोषोद्घाटनं क

अस्तामेतदसभ्यं परदोषगवेषणं परोक्षेथ ॥ ईदृशि भवतश्चरिते बिभीषणा
द्यैरुक्तं किमपराद्धं मे ॥ ४६ ॥ स्वीयमणौ गुणहीने को वा कलहः परीक्षकेण स
ह ॥ त्वयि यादृच्छिककृत्ये भृत्येन सहेर्षया भवेत्किं मे ॥ ४७ ॥ छ ॥

र्त्तव्यमिति भावः ॥ ४६ ॥ इदानीं भवानेव स्वेच्छाचारीत्यतोऽन्यदोषारोपणे न किमित्याह स्वीयमणौ इ
ति स्वीयमणौ गुणहीने स्वकीयो यो मणिस्तस्मिन् गुणहीने सति मणिपरीक्षिकेण सह कलहः को वा न को
पीत्यर्थः तद्वत्त्वयि स्वामिनि प्रभौ यादृच्छिककृत्ये स्वेच्छाचारिणि सति भृत्येन तव सेवकेन सह साक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मीर्षयाउत्कर्षासिहनेनविषादेनममकिंकिमपिप्रयोजननास्ति॥ ४७॥ इदानींमनसिस्थितयावन्ता
वदुक्तंसाध्वसाधुवातत्सर्वंक्षंतव्यमित्याशयेनाह वक्तव्यमिति हेश्रीरामयन्ममनसिस्थितंतवाग्र
तोत्वत्समीपेउक्तमेवंसत्यपियद्यद्याप्य धुनापिरुष्टःसक्रोधस्तर्हिंनन्विति वितर्केतवपादयोश्चरणक

वक्तव्यमेतदुक्तंतवाग्रतोरामयच्चयावच्च॥ यद्य
द्याप्यसिरुष्टस्तन्ननुपतितोस्मिपादयोरुपरि॥४८॥

मलयोःउपरिपतितोस्मिसाष्टांगंनतोस्मि पादयोःशरणागतत्वेननमस्कारक्रिययासर्वेपराधाःक्षंत-
व्याइतिभावः॥ ४८॥ इदानींसतांस्वभावएवैषःयत्प्रणामेकृतेअपराधिन्यपिप्रसन्नेतत्याशयेनाह
प्रणिपातमात्रनीरादिति हेरामचंद्रप्रणिपातमात्रनीरात्प्रणिपातएवप्रणिपातमात्रंतदेवनीरंतेन



For Private And Personal Use Only

महतासाधूनांकोपाशश्रक्षणिःक्रोधाग्निःशाम्यत्युपशमंयाति भोराघवममतुदुरितविपाकैःपापप
रिपाकैःत्वंनाद्यापिइदानीमपिमुक्तकोपोनभवसीत्यर्थः॥४९॥ इदानींसर्वथात्वयाऽहमनुग्राह्यएवे
त्याह त्वत्तुल्यइति त्वत्तुल्योनास्तिविभुःत्वत्सदृशःविभुःस्वामीनास्तित्रिभुवनत्रयेपि मत्तुल्यः

प्रणिपातमात्रनीराच्छाम्यतिकोपाशश्रक्षणिर्महतां॥ममदुरितस्यावि
पाकैराघवनाद्यापिमुक्तकोपोऽसि॥४९॥त्वत्तुल्योनास्तिविभुर्मत्तुल्योना
स्तित्वापरोदीनः॥ दीनानाथस्वामिन् करुणासिंधोब्रुवेहमन्यत्किम्॥५०॥

मत्सदृशःदीनोपिनास्ति हेदीनानाथानांस्वामिन्नेकबंधोव्यसनात्पालककरुणासिंधोदयासागर
अहमन्यत्किंब्रुवेमयाअन्यत्किंवक्तव्यमित्यर्थः॥५०॥ ॥श्री॥ श्री

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदानींत्वंसर्वप्रकाशकःस्वप्रकाशश्चेन्मयिकरुणारूपःप्रकाशोनदृश्यतइत्याशयेनाह त्वयीति त्व
यिस्वयंप्रकाशेस्वप्रभेत्रिभुवनभवनंत्रिभुवनमेवभवनंगृहंतत्प्रकाशयतिसतिकरुणांकरुणालक्षणं
प्रकाशमेवनपश्यामितत्किमहमंधोवातिमिरोपहतनेत्रोवास्मि अथवा साकरुणाभवतित्वयिना

त्वयिनस्वयंप्रकाशेत्रिभुवनभवनंप्रकाशयति॥करुणां
पश्यामिनन्वंधोवाहंनसास्तिवाभवति॥ ५१॥ ॐ

स्तीतिमयिसंदेह इत्यर्थः॥५१॥ इदानींमज्जल्पितेनसाध्वसाधुनातवमनसिविषादेसतिम-
माभीष्टमीप्सितंकरुणापांगवीक्षणलक्षणंनकरोषीत्याशयेनाह नाभीष्टमिति हेरामयदिक- १९
रुणातःकरुणयासार्वविभक्तिकस्तासिःममाभीष्टमभिलषितंनकरोषि किंभूतस्यमेसापराधस्या

For Private And Personal Use Only

परायवतः तस्मात्त्वं मज्जल्पितेनदुर्वचनेनहेतुनास्वांतोद्वेगेनमनसःक्षोभेनवानकुरुषेनकरोषीत्य
र्थः ॥५२॥ इदानींत्वत्तोवैरिणोपिपरमांगतिंप्राप्ताःमद्विषयेकिमुदासीनइत्याशयेनाह अरयोपीति
अरयस्तववैरिणोपिवैरभावात्द्वेषभावादपिस्वेष्टमुत्तमपदप्राप्तिलक्षणंभवतःश्रीरामचंद्राल्लभंतए

नाभीष्टंकरुणातःकरोषियदिरामसापराधस्य॥मज्जल्पकल्पितेनस्वांतो
द्वेगेनकिंनवाकुरुषे॥५२॥ अरयोपिवैरभावादिष्टंभवतोलभंतएवा–
शु ॥दासस्यमेदयालोप्रार्थितदानेसिकथमुदासीनः॥५३॥ ॥

वप्राप्नुवंत्येवाशुशीघ्रमेव हेदयालोकृपासमुद्रदासस्यमेऽभिलषितदानेकथमुदासीनोसीत्युदा–
सीनत्वेकिंकारणमितिनजानामीतिभावः॥५३॥ ॥छ॥ ॥छ॥

ननुनादत्तमुपतिष्ठत्यनेनन्यायेनकिंचिद्दत्तेनविनाकस्यापिकिंचिन्नदीयतेमयेत्याशंक्याह नादत्त मिति नादत्तंदत्सेचेददत्तंनददामीतिवदसिचेत्तर्हिविभीषणेनरावणभ्रात्रापुरीनगरीपुराकस्मै पात्रभूतायदत्तापिचकिष्किंधाराज्यंकिष्किधाख्यनगराधिपत्यंकपिनासुग्रीवेणजन्मांतरेकस्मै



नादत्तंदत्सेचेत्कस्मैदत्ताविभीषणेनपुरी॥कि
ष्किंधाराज्यंवाकपिनादत्तंभवांतरेकस्मै॥५४॥

दत्तंकुत्रापिपुराणादौनश्रुतम् तस्माददत्तमपिददासीतिभावः॥५४॥इदानीमपितुभ्यंदीयतेत देवददासीतित्वयिकोपिनियमोनास्तीत्याशयेनाह श्रीदामतइति श्रीदामतःस्रुदामशर्मणःद्वि जात्पृथुकाभर्जिततंदुलविकृतयोगृहीताःस्वीकृताःपरिमिताद्वित्रिमुष्टिमात्रास्तएवकिन्नोदत्तास्त



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्माद्दत्ताधिकमपिददासीत्यर्थः अधिकंकिंदत्तमित्याशयेनाह ऐंद्रंपदमिंद्रपदसमानंवैभवमिहा-
स्मिन्लोकेतस्मैस्कदाम्नेदत्तमर्पिततत्तस्यकेनकृत्येनकेनस्कृतपरिपाकेन तस्माद्दत्तसदृशमेवदी
यतेऽयंनियमःत्वयिनास्तीतिभावः अवतारांतरत्रमिदमित्यल्पबुद्धिमतांभेददृशांभातिभक्तानामेक

श्रीदामतोगृहीताःपृथुकाश्चत्किंतएवनोदत्ताः॥ऐंद्र
पदमिहतस्मैदत्तंतत्केनतस्यकृत्येन॥५५॥

त्वद्दशामभेददृष्टीनांएकमेवरामचरित्रंविनानभातीति कृष्णावतारेपिजांबवदादीनांश्रीरामरूपेणैव
दर्शनमादिकाव्यादिषुप्रसिद्धमहामुद्गलभट्टादीनांमपिप्रसिद्धिः॥५५॥ इदानींत्वयावैपरीत्येनापि
फलंप्रदीयतइत्याशयेनाह उन्मोचितइति उन्मोचितोगजेंद्रोग्राहाद्रक्षितोद्विपःकिंभूतोगजेंद्रःमदां

For Private And Personal Use Only

दृष्टिःमदोन्मतस्तिर्यगुद्भूतिःपशुयोनिःएवंभूतोपिसः अधमयोनिरपिरक्षितइतिवैपरीत्यमेकंअन्यच्च
दातादानशूरःसेवककुलजश्चप्रल्हादवंशोद्भवोपिबलिःत्वयापातालेबद्धःनागपाशैर्बध्वास्थापितइद
मपिवैपरीत्यमतोविपरीतकर्तृत्वमपित्वय्यस्तीतिभावः॥५८॥ अन्यदपिविपरीतकर्तृत्वंरावणादि-

उन्मोचितोगजेंद्रोमदांधदृष्टिश्चतिर्यगुद्भूतिः॥दाता
सेवककुलजःपातालेचत्वयाबलिर्बद्धः॥५८॥ ७

षुदर्शयति उद्धृत्तचित्तवृत्तिरिति उद्धृत्तचित्तवृत्तेर्दुश्चरितस्यपरदारहरणवृत्तेर्दशास्यस्यरावण
स्योत्तमलोकस्थितिर्वैकुंठप्राप्तिरन्यच्च दशरथसंज्ञस्यविभोर्धराधीशस्योच्चैस्तरांमहानधःपातःक्ल २१
ल्पितोनिर्मितःइदमेकंदशरथराज्ञोऽधःपातेऽमेवंभाति॥अधःपातस्यकुत्राप्यश्रुतत्वादत्रनूक्तत्वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृशरथसंज्ञस्यविभोरधःपातोनामस्वर्गनिरययोःसुखदुःखाभिधानत्वात्श्रीमद्रामब्रह्मपुत्रावास्या
तिपरसुखस्वर्गोपरिस्थितस्यविभोर्दशरथस्यराज्ञःदेहावसानसमयेऽवशेषप्रारब्धोपभोगत्वात्
अवश्यमेवभोक्तव्यंकृतंकर्मशुभाशुभं कृतकर्मक्षयोनास्तिजन्मकोटिशतैरपिइतिवचनात् प्रार-
ब्धकर्मणाभोगादेवक्षयःइत्यपिवचनात् श्रीरामाभिषेकाभिघाताद्यतिशयदुःखादवनौपतनमेवाधःपा

उद्धृतचित्तवृत्तेरुत्तमलोकस्थितिर्दशास्य॥दशरथसंज्ञस्यविभोःकल्पितमुच्चैस्तरा
मधःपातः॥५७॥ ७॥ तोवगंतव्यःदुःखप्रारब्धोपभोगक्षयेजातेलोकायामीशाद्यमरगणैःसाक
मागतस्यदशरथस्यश्रीरामेणाभिवंदनालिंगनेकृतेसतिनिरतिशयसुखावाप्तिर्जातेतिचोक्तमादिका
व्यादिषुनात्रकाप्याशंकेत्यर्थः यद्वामोक्षधर्मेषुभृगुभरद्वाजसंवादेस्वर्गादयोपिनरकेषुपरिगणिताःतादृ
शलोकप्राप्तिरधःपातः अयमर्थः दशरथस्यसाक्षात्परमेश्वरप्राप्तेर्मोक्षएवयोग्यस्तदप्राप्तिरेवाधःपातःप
तनमिति॥५७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदानींप्रयत्नम कुर्वंतोरपिसमीहितंददासी त्याह सुग्रीवइति सुग्रीवविभीषणयोःप्रसिद्धयोरुभयो
स्तूष्णींस्थितयोर्निर्व्यापारयोःपरमुत्कृष्टंराज्यंतत्तद्देशाधिपत्यमभूज्जातंत्वयैवदत्तमित्यर्थः अन्य
त्सर्वक्लेशाभिषिक्तेसर्वक्लेशसहेत्वत्साधर्मेवंभूतेवायुनंदनेकपिपतौप्रसन्नतामौनमेवतूष्णींभावस्त

सुग्रीवविभीषणयोस्तूष्णींस्थितयोरभूत्परंराज्यं॥स
र्वक्लेशाभिषिक्तेप्रसन्नतावायुनंदनेमौनम् ॥ ५८ ॥

स्यकिमपिलौकिकपदार्थेषुनदत्तमित्यर्थः वास्तवार्थस्तुतस्ययद्दत्तंतन्न कस्यापीत्यर्थः गुरोस्तु
मौनंव्याख्यानंशिष्यास्तुच्छिन्नसंशयाः॥५८॥ इदानींकिंबहूक्तेनयद्यत्करोषितत्तत्सर्वंत्वय्युप
पद्यतइतिआशयेनाह यद्यत्करोषीति यत्त्वयाक्रियतेतत्त्वमहेश्वरत्वेनमहाप्रभुत्वेनतत्सर्वंत्व-



For Private And Personal Use Only

यिशोभतेद्योततेईश्वरत्वादित्यर्थः इदानींकिंबहूक्तेनप्रार्थनीयंतंदेवप्रार्थयितव्यमित्याह आस्तामि
ति ननुनिश्चयेसकलमास्तांभवद्गुणदोषकथनंतिष्ठतुसकलंकमपिसदोषमपिमांत्वत्सेवकंरामपाहि
रक्षकृपापांगेनावलोकयेत्यर्थः॥ ५९॥ त्वयाकिंचिदपिनवक्तव्यमहंतुतवाभीष्टंनददामीतिचेदिदा

यद्यत्करोषिचैतन्महेश्वरत्वेनशोभतेभवतः॥आस्तांतन्ननुसकलंसकलंकम
पिपाहिमांराम॥५९॥चैलांचलेधृतोसिप्रसभंकुत्रापयास्यसिस्वैरम्॥कुरुवा
जीवनवृत्तिंवदवाव्यवहारमीज्यलोकेषु॥६०॥ ॥ नीमयात्वमत्यंतसमीपतयाचैला
चलेधृतइवभासीत्याशयेनाह चैलांचलइति हेराममयात्वंचैलांचलेधृतोसिवस्त्रपल्लवेगृहीतोसिमत्सकाशात्
प्रसभंबलात्कारेणअन्यत्रकुत्रस्वैरंस्वेच्छयाऽपयासिगच्छसि ममतावज्जीवनंकुरुयोगक्षेमंवहवाऽथ
वारामेङयपूज्यलोकेषुजनेषुव्यवहारंममाभीष्टदानविषयेवादंकुरुयथालोकेपित्रासहपुत्रादिभिर्दानविष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येवादःक्रियतेतद्वदित्यर्थः॥६०॥इदानींत्वमेवसर्वमित्याशयेनाह हेरामत्वंभवानेवममजननीमाता
जनकःपितापित्वमेवबंधुःकुलंशीलंचत्वमेव एवंचसतित्वयिस्वामिनिनिष्ठुरतांनिर्दयत्वंयातेप्राप्ते
सतितृणमपिमयीशानस्वामिन्वज्रायतेवज्रवदाचरतिकुलिशप्रायंभवतीत्यर्थः॥६१॥इदानीत्व

त्वंममजननीजनकस्त्वमेवबंधुःकुलंचशीलंच॥त्वयिनिष्ठुरतांयातेतृणम
पिवज्रायतेमयीशान॥६१॥कृपयाद्रक्ष्यसिमांचेत्तृणायमन्येचकालमप्यु
च्चैः॥अकृपाचेत्तवराममप्रायस्तृणमपिकालरूपंमे॥६२॥ ७ त्कृपाचेत्कालादिभ्यो

पिममभयंनास्तीत्याशयेनाह कृपयेति हेरामत्वंमांकृपयाद्रक्ष्यसिचेत्करुणयापश्यसिचेद्यदितदोच्चैः
कालंमहांतमपिकृतांतंतृणायमन्येतृणसमानमपिनगणयामि भोराम।कृपाचेत्तवकरुणयानावलो
कितोयदितृणमेवकालरूपंप्रायोबहुशःमेममभविष्यति॥६२॥ ॥७॥ ॥



For Private And Personal Use Only

इदानींस्वामिनामग्रेबहुधाष्टर्यमनुचितमित्याशयेनाह अथवेति अथवापक्षांतरेअहोइतिखेदेकिंबहु जल्पेनप्रभोःपुरतःस्वाम्यग्रेधाष्टर्यंधृष्टत्वमिहास्मिन्विषयेकिमुचितंनोचितमित्यर्थःकुतोनोचितमि त्याह जन्मप्रबंधइति जन्मप्रबंधसिद्धाःउत्पत्तिपरंपराश्रिताःदोषाःपुराणपापलक्षणाआधीनांचि

अथवाहोकिंबहुनाधाष्टर्यंकिमिहोचितंप्रभोःपुरतः ॥
जन्मप्रबंधसिद्धाअधीनांयांतिमूलतांदोषाः॥६३॥

त्तविक्षेपलक्षणानांमूलतांहेतुतांयांतिप्राप्नुवंति जन्मांतरकृतादोषा एवसकरवदुःखहेतवइतिभा वः॥६३॥ इदानींजन्मांतरेवावर्तमानजन्मनिवातवाराधन हीनस्यकथंस्वेष्टप्राप्तिरित्याशयेनाह ना राधितइति नाराधितोनसेवितःपूर्वंपूर्वजन्मनिक्कचिदपिकदापीदानींसांप्रतमपिनाराधयाम्येकांत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्त्यानभजामि अथचस्वकीयमभिलषितमिच्छामिवांछामिबाढमत्यर्थंहारेखेदेकष्टंसंक्लेशमूढतैव मेअज्ञतैवैषाममेति॥ ६४॥ इदानींसकलदोषनिचयसंपन्नमपिस्वीयमितिमत्वाकृपांकरोषिचेत्त्वा त्यंतक्षमेत्याशयेनाह दुर्वृत्तमिति दुर्वृत्तंदुर्बुद्धिंकुमतिंकामादिवशंकामक्रोधलोभमोहमयंभवति

नाराधितोसिपूर्वंक्कचिदपिनाराधयामिचेदानीं॥ इच्छामिचस्वमिष्टंक
ष्टंहासूढतैवमेबाढम् ॥ ६४ ॥ दुर्वृत्तंदुर्बुद्धिंकामादिवशंपराङ्मुखंभ
वंति॥ पालयसिमांयद्येषाराघवभवतःक्षमोच्चैकैर्जयति॥ ६५ ॥

पराङ्मुखंस्वामिनिविमुखमित्यादिदोषगणयुक्तमेतादृशंमांराघवयदिपालयसितर्हिभवतःस्वामिन उच्चैकैःसर्वोत्कृष्टाक्षमाजयतिसर्वोत्तमासहप्रुतेतिभावः॥ ६५॥ ॥ छ॥ ॥



For Private And Personal Use Only

इदानींमयितवदयैववर्त्ततेइतिजानाभीत्याशयेनाह रचितेति रचितापराधजालेकृतापराधसमूहेम
यिसेवकेत्वंसदयोसिकृपालुरसीत्यनेनैवहेतुनाबेभ्रिजानामिकेनहतुने त्याशयेनाह मुखतइति मेमु
खतःममुखान्निरंकुशाप्रतिबंधरहितारामेतिमुहुर्मुहुःवाकूप्रवर्त्ततेनिःसरतियतोयस्मात्कारणाद

रचितापराधजालेमयिसदयोसीतिवेद्म्यनेनैव ॥
मुखतोनिरकुशामेरामेतियतःप्रवर्त्ततेवाणी॥६६॥

तोजानामिस्वामिनांकृपावर्ततइतिभावः॥६६॥ इदानींव्यतिरेकमुखेनस्वस्मिन्कृपांसंभावयतिकृ
पास्तीस्त्यनुमीयतइत्याशयेनाह नैवेति यस्मिंस्तेनानुकंपायस्मिन्पुरुषेतवकृपानास्तितस्यास्यत
स्तस्यपुरुषस्यमुखाद्वक्त्रात्कथंकारंकथंवाप्रसरेद्रामेतिवाक्यंनिरामयंनिर्दोषं किंभूतस्यपुरुषस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किल्बिषमुद्राभाजःकिल्बिषाणांपातकानांमुद्रांलक्षणंभजतीतिभाक्तस्यभाजःपापलक्षणालंकृत
स्येत्यर्थः॥ ६७॥ ननुतवकृपामय्यस्तिममदोषान्भवान्निर्मलान्किमितिनकरोषित्वयानोक्तत्वादिति
न्चेदत्रपुनरपिस्वदोषाविष्करणमेवकरोति तृष्णेति तृष्णाव्यालविषार्तंतृष्णेवव्यालःसर्पस्तस्यविषं

नैवास्तितेनुकंपायस्मिंस्तस्यास्यतःकथंकारम्॥कि
ल्बिषमुद्राभाजोरामेतिनिरामयंवचःप्रसरेत्॥६७॥

तेनार्तंपीडितमथचधनधनशब्देर्द्रव्यद्रव्येतिप्रलापैरुर्व्यांपृथिव्यांपतंतंलुठंतमथचगुरुतापमत्यंतसं
तप्तंमांहेगरुडध्वजरामचंद्रजीवनदानेनाशुरक्षपालयमांपा हीत्यत्रहेरामत्वयैवंवक्तव्यमरेयस्येद्द
शमस्तिसामर्थ्यंसप्रार्थनीयइतिन्चेत्तवध्वजोपरिस्थितस्यांडजवर्यस्याऽप्यस्तिसर्वसामर्थ्यंतस्येश



For Private And Personal Use Only

स्यतवास्तीतिकिंवक्तव्यमतोगरुडध्वज तृष्णाव्यालविषापाकरणेनपाहिधनाशोपमर्दनेनरक्षस्वच-
रणस्थजीवनदानेनतापोपहत्याऽवगरुडध्वजेतिसंबोधनेनैवसामर्थ्यद्योतितमन्येतेनेनगरुडमणि
नालोकेविषापहरणंधनलाभश्चतापहरणंन्चेति यस्यनाममणिनांचैवंसकिंकरत्वेनध्वजेस्ति

तृष्णाव्यालविषार्तंधनधनशब्दैःपतंतमुर्व्यांमाम्॥
गरुडध्वजगुरुतापंजीवनदानेनपाहिरक्षाव॥६८॥

अतःत्वयैवममसर्वदुःखापहरणंकर्त्तव्यमित्यर्थः यथाअत्यंतसंतापितःपृथिव्यांमूर्छितःप-
तितःपुरुषःदयालुनाकेनापिसतासत्पुरुषेणजीवनदानादिभिःजीव्यतेतद्वदित्यर्थः॥ ६८॥
पुनरपिप्रार्थयति तृष्णेति तृष्णानिदाघतसंतृष्णोवानिदाघउष्णोपगमस्तेनतमंबहुसंतापित

मतएवशुष्यत्कंठंसशोषगलंनिराश्रयंरक्षितृरहितमतएवदीनमेवंभूतंमांकरुणाकटाक्षवृक्षच्छायां
छायेवछायातामच्छा मतिस्वच्छांशीतलामित्यर्थः विधायकृत्वामांपाहिरक्ष ॥ ६९ ॥ पुनरपिप्रकारां
तरेणप्रार्थयति तृष्णाकल्लोले त्ति तृष्णैवकल्लोलवतीमहानदीतस्याविशालामहांतोयेकल्लोलाः

तृष्णानिदाघतप्तशुष्यत्कंठंनिराश्रयंदीनं ॥ करुणाकटाक्षवृक्षच्छायाम
च्छांविधायमांपाहि ॥ ६९ ॥ तृष्णाकल्लोलवतीविशालकल्लोलसंकुली॰
भूतम् ॥ करुणापांगनिरीक्षितगुणजालैःकर्षमांप्रकर्षेण ॥ ७० ॥ छ

महातरंगाःतैःसंकुलीभूतमेवंभूतंमांरामभद्रस्वकीयकरुणापांगनिरीक्षितगुणजालैःकरुणानिरी
क्षितमेवगुणजालानिरज्जुसमूहास्तैःप्रकर्षेणबलेनमांकर्षकिर्षयेत्यर्थः ॥ ७० ॥ छ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृष्णेति तृष्णैवनक्रःमहान्मत्स्यविशेषःतेनविक्लष्टंकर्षितमतएवकष्टंप्राप्तंचिरायबहुकालंदेवेशासी।
तापतेकरुणार्द्रचित्तवृत्तेप्रीत्यात्यंतवात्सल्येनगजेंद्रमिवमांसमुद्धराशापाशतोनिष्कासयेत्यर्थः॥
॥७१॥ पुनरपिप्रकारांतरेणस्तौति तृष्णास्फकेत्विति तृष्णैवस्फकेतुकन्याताटकानामराक्षसीत-

तृष्णानक्रविक्लष्टंकष्टंप्राप्तंचिरायदेवेश॥ करुणार्द्रचित्तवृत्तेगजेंद्रमि
वमांसमुद्धरप्रीत्या॥७१॥ तृष्णास्फकेतुकन्याभीतंत्वांशरणमापन्नं॥
विश्वामित्रमिवोच्चैर्विश्वार्तिविनाशनाशुमांपाहि॥७२॥ ❀

स्याःसकाशाद्भीतंत्रस्तमतएवत्वांशरणमापन्नंशरणागतत्वेनप्राप्तंमांसेवकंविश्वामित्रमिववि
श्वामित्रर्षिवत् उच्चैर्विश्वार्तिविनाशनजगतःसर्वार्तिनाशनरामआशुमांपाहिशीघ्रंरक्ष॥ ७२॥

For Private And Personal Use Only

मु॰भा पुनरपिदयोत्पादकवचनैःप्रार्थयते तृष्णारूबाह्विति तृष्णैवरूबाहुःसमुख्यःप्रधानःयेषांताह सटी॰
२७ शायेक्षपाचराःराक्षसाःतेषांव्रातःसमूहस्तेनविघ्नितमुपद्रुतमेतादृशंमांहेवीरविघ्ननिवारणक्षमराम
गाधिजमुनिमखमिवगाधिजमुनिर्विश्वामित्रऋषिःतस्यमखोयज्ञस्तमेवरक्षोरेराक्षसशत्रोहेजान

तृष्णारूबाहुमुख्यक्षपाचरव्रातविघ्नितंवीर॥गाधिजमुनिमखमि
वमांरक्षोरेरक्षजानकीजाने॥७३॥पाषाणतांप्रयातंमुनिशापेनैवपू
र्वपापेन॥मन्तनुशल्यमहल्यातुल्यतयारचयकल्पकल्याणं॥७४॥

कीजानेसीतापते रक्षेतिपाठऽयमेवार्थः॥७३॥ पुनरपिप्रार्थनांकरोति हेरामाहल्योद्धारेतवमहाना
ल्हादोजातस्तर्हिमन्तनुशल्याहल्योद्धरणेनाऽनंदंसंपादयेत्याह पाषाणतामिति पाषाणतांशिलात्वं २७
प्रयातंप्राप्तंमुनिशापेनैवगोतमशापेनैवपूर्वपापेनजन्मांतरपातकेनमन्तनुशल्यंमन्तनुरेवशल्यमह-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ल्यातुल्यतयासमतयातुल्यत्वंपापाचरणेनजडत्वेनचरच्चयकल्पयादोपश्चात्कल्योद्धरणसमर्थराम
चंद्र कल्याणंकुशलं यथाचरणोपस्पर्शेनाहल्योद्धरणंकृतं मन्तनुशल्यस्यापिचरणोपस्पर्शेनोद्धरणं
कुर्वित्यर्थः॥७४॥ पुनरपिप्रकारांतरेणवदति ननुधनुर्भंगेमहांस्तवोत्साहःश्रूयते नाकारिषंगुरुजने

अधिगतकोटियुगांतंनद्धगुणंराम पापमस्माकम् ॥
अंडजमंडनवाहनखंडयचंडीशचापदंडमिव॥७५॥

रुपदिष्टधर्मंयेनप्रसीदतिभवान्प्रणतार्तिहारी हाधिग्ममाज्ञतरत्तांशिवधर्मभंगात्पाणिग्रहोत्सवजुषः
कनुधर्मचिंतेति तर्हिमन्निकटस्थपापधनुर्भंगेनोत्साहंसंपादयेत्याह अधिगतेति अधिगताकोट
योःसंख्यायेषामेतादृशानियुगानितेषामंतपर्यंतंनद्धगुणमारोपितगुणमस्माकंपापंचिरकाला-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्जितमित्यर्थः। हेअंडजमंडनवाहनचंडीशचापदंडमिव धनुरिव खंडय भंजय॥७५॥ पुनरपिप्रकारां
तरेणस्तौति ननु कुंठितगतौ तवमहान्हर्षस्तर्हि कुंठितगतिमेव कुर्वित्याह निर्भूपीति निर्भूपीकृतंनी
राजकंसंपादितंभूतलंक्ष्मातलंयेनतादृशमथचार्जुनयशसःसहस्रार्जुनकीर्तेरंतकंनाशकंएतादृशं

निर्भूपीकृतभूतलमर्जुनयशसोंतकंसकंपस्य ॥
कुरुदैन्यमेलकंमेकुंठितगतिमीशजामदग्न्यमिव॥७६॥

जामदग्न्यमिव मे दैन्यमेलकं दारिद्र्यं कुंठितगतिमकार्यक्षमंकुरुसंपादय इशदैन्यनिराकरणमित्य
र्थः॥७६॥ पुनरपिरूपकांतरेणप्रार्थनांकरोति हेरामयदिवनप्रवेशोऽतिहर्षस्तव तर्हिवनप्रवेशमेव
कुर्वित्याशयेनाह मृगजलेति मृगजलबुद्धिर्वंध्याबुद्धिरन्यथाभासरूपातयासमृद्धंव्याप्तंनिदा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घेनोष्णापगमेनतप्तंसंतप्तंसंतापितंमेरुणास्फवर्णाद्रिणापिनपूर्णंयदावनविशेषणंतदानेमेरुस्तृणावि
शेषस्तेनपूर्णंव्याप्तं एतादृशंवनमिवमानसंहेरघूत्तमरघुकुलभूषणहेसप्रियावरजप्रियायाश्चाविरुज-
श्चप्रियावरजौसीतालक्ष्मणौताभ्यांसहितयुक्तप्रविशतत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः प्रविष्टस्ये

मृगजलबुद्धिसमृद्धंनिदाघतप्तंनमेरुणापूर्णम् ॥
वनमिवमानसमुच्चैःप्रविशरघूत्तंससप्रियावरज ॥७७॥

वप्रवेशप्रार्थनानघटतेतथाप्यावरणभंगद्वाराऽविर्भवेत्यर्थः ॥७७॥ इदानींतवरूपा तुवर्त्तते तथा
दारिद्र्यमपिवर्ततेदरिद्राहिभक्ताःप्रमादिनोनभवंतीत्यतएवत्वयोक्तंयस्यानुग्रहमिच्छामितस्यवित्तं
हराम्यहं इत्यभिप्रायेणसंपदंनददासीत्याशयेनाह अपदीति आपदिविपत्तिकालेमांसर्वेश्वरंस्मर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

त्ति दरिद्रः प्रायः बहुधा तेनैवाभिप्रायेण मम संपदं न करोषि मां संपत्तियुक्तं न करोषीत्यर्थः तव मनस्य भिप्रायश्चेत् मदीयया मत्कृतया स्मृत्या हे रघूत्तं स तेत्तव किमधिकं भविता न किमपीत्यर्थः॥७८॥ इदानीं दयास्वभावस्य ते भजनादि निरपेक्ष्यमेव सर्वत्र दयाकरणमुचितमित्यभिप्रायेणाह अपनयेति अ-

आपदि मां स्मरतीति प्रायो न करोषि संपदं मम चेत्॥ स्मृत्या मदीयया ते भविता किमिवाधिकं रघूत्तंस॥७८॥ अपनय दैन्यमुदग्रं परिहर चिंतान्वयं समग्रं मे॥ त्वन्मुखवीक्षा भिन्नं यत्नं न करोमि कर्हिचिद्राम॥७९॥ छ

पनय दैन्यमुदग्रं दैन्यं दारिद्र्यलक्षणं उदग्रं महांतम परं चिंतान्वयं चिंतासमूहं समग्रं समस्तं मे मम आपनय दूरीकुरु अन्यं कंचित्तवरामस्य मुखं तस्य वीक्षा सादरमवलोकनं तद्भिन्नं तद्विहायान्यं यत्नं न करोमि कर्हिचित् कदाचिदपि हे राम तव श्रीमुखारविंदावलोकनान्ममान्यः प्रयत्नो नास्तीति भावः॥७९॥ छ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदानींममनसः चिंतांनिराकुरुष्वेत्याशयेनाह ममेति ममदीयआधिरेववाधिर्मानसीव्यथासएव समुद्रस्तंनाशयदूरीकुरु विविधापराधसंबंधंनानाप्रकारायेपराधाःअपनयास्तेषांसंबंधंतत्कृतविक्षेपंक्षमस्व हेशरणागतजनवत्सलशरणंप्राप्तानांवत्सलकृपाकरराघवाऽहंतेतवशरणागतोस्मिदा-

ममनाशयाधिवाधिंक्षमस्वविविधापराधसंबंधं।।शरणागतजनवत्सलरा
घवशरणागतोस्मितेदासः।।८०।। दशशतकरवंशभवेदशरथपृथ्वीशपूर्व
पुण्यौघे।। दशवदनांतकरूपेचेतश्चिरमास्वराघवेभूपे ।।८१।। छ।। सोस्मिच।।८०।।

ननुत्वयोक्तंसर्वंमयासंपाद्यंतवतुचित्तमतिचपलंमय्यपिनतिष्ठती।तिकिंकर्त्तव्यंमयेत्यत इदानीं स्वकीयमनसःप्रार्थनांकरोति दशशतेति दशशतकरवंशभवेसहस्रकिरणकुलोत्पन्नेदशरथपृथ्वीशपूर्वपुण्यौघेदशरथराज्ञःजन्मांतरपुण्यराशिरूपेऽथचदशवदनांतकरूपेरावणमृत्युरूपेरा

घवभूपेरामचंद्रनृपवर्यहेचेतःमनश्चिरमास्वचिरकालंतिष्ठ तंविहायअन्यत्रमागच्छेत्यर्थः ॥८१॥ इदानींमिथ्याभूतविषयचिंतनेनतवपुरुषार्थसिद्धिर्नास्तीत्याशयेनाह किंतवेति हेचेतःतवस्कृतधनजायामायारूपचिंतयास्कृतःपुत्रःजायास्त्र्यादियन्मायामयंमिथ्यारूपंतस्यचिंतयाध्यानेनकिंकिमपिप्रयो-

किंतवधनस्कृतजायामायामयरूपचिंतयाप्यनया ॥अ
नपायाऽनंदमयेकिमयेरमसेनराघवेचेतः ॥८२॥ ७

जनंनास्ति अनयेति मायाविशेषणंप्रत्यक्षमनुभूयेत्यर्थः हेचेतः अनपायानंदमयेक्षयानंदरूपेरा घवे अयेतिचेतोविशेषणंकिंनरमसेकुतोनक्रीडसि ॥८२॥ पुनरपिचेतःप्रार्थनांकरोति त्यजेति निजगजवाजिकथांस्वसंबंधिनींगजवाजिकथांहस्तिहयकथांवार्तांजिठरेस्वोदरेजगद्दहंतंतमजंविख्यातंजन्मा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिरंहितंरामंभजभजेतिद्विरुक्तिरादरार्थे ननुनिश्चयेन्चेतःमानसतत्प्रास्यारामप्रास्यासकलंसर्वकामजातं प्राप्स्यसिवैपरीत्येनपृथग्विषयचिंतनेनसकलमनोरथसिद्धिर्नभवतीतिभावः ॥८३॥पुनरपिचेतःप्रार्थनमेवक्रियते हितमात्रमिति हेचेतःत्वंहितमात्रंहितमेववांछसिचेत्त्वहितंप्रियमिच्छसिचेद्यदितर्हिरा

त्यजनिजगजवाजिकथांभजभजजठरेजगद्दहंतमजं॥ तत्प्रास्यानन्तु
चेतःप्राप्स्यसिचेतन्नवैपरीत्येन॥८३॥हितमात्रंवांछसिचेन्मंजूषांत्वंगृ
हाणरामाख्यां॥ नोचेच्चंचलशीलैर्वंचितमसिचित्तचंचलैर्विषयैः॥८४॥

माख्यांरामाभिधांमंजूषांपेटिकांजुषस्वसेवयगृहाणेतिपाठस्वीकुरुनोचेद्रामनाममंजूषासेवनेनविना चंचलशीलैश्चपलस्वभावैःविषयैःधनादिभिर्वंचितप्रतारितमसिविषयेष्वासक्तंभविष्यसीत्यर्थः ॥८४॥ इदानींजगदुत्पत्तिस्थितिलयकारणसमर्थमीश्वरंविहायान्यंमाभजेत्याशयेनाह कर्त्तुमिति कर्त्त

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुत्पादयितुं अन्यथाकर्त्तुमनुत्पादयितुमन्यथाकर्त्तुं वैपरीत्येन कर्त्तुं सकलं सर्वं जगद्यः शक्तः समर्थस्तं
विहाय रामं मानसान्यस्मिन्नीश्वरभिन्नपदार्थे कामममभिलाषं माधेहि माकुरुष्वेत्यर्थः अन्यत्रासक्तत
याऽभिलषितसिद्धिस्तव नास्तीतिभावः ॥८५॥ एवं मनसः प्रार्थनां कृतातथापि प्रमाथिभवत्यतो दा-

कर्तुमकर्त्तुंशक्तःसकलंजगदेतदन्यथाकर्त्तुं॥यस्तंविहायरामंकामंमाधेहिमा
नसान्यस्मिन् ॥८५॥ दारिद्र्यदावशांत्यैवर्षतुकरुणाकटाक्षनीराणि॥नित्यांक
स्थितविद्युत्कश्चनवैकुंठमंडनंमेघः॥८६॥ ॥रिद्र्यदावापहरणसामर्थ्यंरामस्यैवास्ती

तिज्ञात्वेदानींसर्वशक्तिमान्राममेघःमयिकृपापांगदृष्टिंकरोत्वितिप्रार्थयते दारिद्र्येति दारिद्र्यदाव-
शांत्यैदारिद्र्यमेवदावानलस्तस्यशांत्यैशमार्थंकरुणाकटाक्षाएवनीराणिजलानिवर्षतु कथंभूतोराम ३१
मेघः नित्यांकस्थितविद्युन्नित्यंनिरंतरंअंकेस्थिताविद्युदस्यसःविद्युद्रूपायालक्ष्मीःसीतेत्यर्थःएतादृशंवै

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुंठमंडनंवैकुंठभूषणंमेघोजीवनदः॥ ८६॥ पुनरपिप्रार्थनांकरोति स्मेरमुखांबुजमिति स्मेरमुखांबुजंसंदरमुखारविंदमुद्यन्नवनीरदनीलमुदितमेघश्याममिंदिरागेहंलक्ष्मीनिवासःपरिहरतुदूरीकरोतुदुःखजालंक्लेशसमूहंजातमितिपाठेसमग्रंकिमपितेजःधामकिलक्षणंतेजइनवंशसंभूतंसूर्यकु

स्मेरमुखांबुजमुद्यन्नवनीरदनीलमिंदिरागेहं॥ परिहरतुदुःखजालं
तेजःकिमपीनवंशसंभूतं॥ ८७॥ सरयूतीरपुरेशेस्फुरेशभव पूज्यपाद
पीयूषे॥ वैदेहीहृदयेशेममभक्तिरिहास्तुमानुषवेषे॥ ८८॥ छ. लसंभवंरामचं

द्राख्यमित्यर्थः॥ ८७॥ ननुतवसगुणेनकिंनिर्गुणेतूष्णीमास्वतिष्ठेतिचे न्नवतथैवास्तुममत्वयमेवास्त्वित्यभिप्रायेणरामविषयिण्येवभक्तिरस्त्वितिवदति सरयूतीरेति सरयूतीरपुरेशेअयोध्यानगरस्वामिनिस्फुरेशभवपूज्य पादपीयूषेशतमखेशानादिसुरैःपूज्यंपादपीयूषंचरणामृतंयस्यतस्मिन्वे

देहीहृदयेशेसीतापतौमानुषेवेषमायामनुष्यरूपधारिणिममभक्तिरस्त्विहास्मिन्राघवेइत्यर्थः॥८८॥
इदानींपूर्वोक्तभक्तिप्रकर्षविकुड्स्वांताविर्भूतश्रीरामध्यानमानंदरूपत्वेनवर्णयति दशरथेति दशर-
थनंदननामाश्रीरामनामान्चंदनधामाशीतलद्युतिःकिंलक्षणःस्मतांतदुदयेक्रीडतामभिनंदनआनंदक

दशरथनंदननामाचंदनधामाभिनंदनोरमतास् ॥ मद
यतिमदीयमुदितःकश्चनमोदोहृदंतरंदातम् ॥ ८९ ॥

रःएतादृशउदितःसन्हृदयेआविर्भूतःसन्कश्चनमोदःस्वरूपाविर्भावलक्षणआनंदःदातंस्वच्छंअवदातः
सितेगौरोइत्यभिधानात् मदीयंहृदंतरंस्वांतांतरंमदयत्यत्यंतमाल्हादयति॥८९॥ इदानींतदेवस्वरूपं ३२
प्रकारांतरेणवर्णयति रामाभिधेति रामाभिधारामनामकाअभिरामामनोहराश्यामेंदीवरश्यामलाधरि-

त्रीपुत्रीप्राचीनधर्मलब्धापूर्वार्जितपुण्यपरिपाकप्राप्ताकाप्यपूर्वमैत्रीप्रीतिःमेमानसंममहृदयंसमासा
द्यप्राप्यास्ते.तिष्ठति॥१०॥ पुनरपिध्यायेद्राजानुबाहुं इतिध्यानंप्रकारांतरेणस्तौति॥ वामांगसंगीति
वामांगसंगिविद्युन्मालंसंगोविद्यतेयासांताःसंगिन्यःसंगिन्यश्चताःविद्युत श्चसंगिविद्युतःसंगिवि-

रामाभिधाभिरामाशामामेमानसंसमासाद्य॥मैत्रीकापिधरित्रीपुत्री
प्राचीनधर्मलब्धास्ते॥१०॥ वामांगसंगिविद्युन्मालंनीलंविलंघितानं
गं॥ दशरथपूर्वजपुण्यंपश्यतपीयूषपूरितापांगम्॥११॥ छ

द्युतांमालासंगिविद्युन्माल यावामांगस्यसंगोविद्यतेयस्याःसावामांगसंगाऽलंकारादिद्युतासीतैवसं
गिविद्युन्मालाविद्यतेयस्यतंविद्युन्मालंवामांगसंस्थितसीतालक्षणेवसंगिविद्युन्मालातयाशोभितमि
त्यर्थः नीलंस्वशरीरकांत्याश्यामंविलंघितानंगंतिरस्कृतकंदर्पमेतादृशंदशरथपूर्वजपुण्यंदशरथपू

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्वभवपुण्यंसकृतंपश्यतावलोकयत किंलक्षणंपीयूषपूरितापांगमम्नृतपूर्णावलोकं ॥ ११ ॥ इदानीं
पंचायतनविशिष्टंवामभागेसमासीनमितिध्या नंवर्णयति अनिलेति अनिलतपःफलंवायोस्तपसः
फलंपुत्ररूपंहनूमानित्यर्थः अग्रेपुरतःपृष्टेस्नेहंस्नेहविशिष्टंलक्ष्मणंकिंलक्षणंस्नेहंसचामरच्छन्नंचा

अनिलतपःफलमग्रेपृष्ठेस्नेहंसचामरच्छत्रमू ॥
पार्श्वेभक्तिविशेषोमध्येतडिदंबुदावहंवंदे ॥ १२ ॥

मरछत्रयुक्तं पार्श्वेसमीपेदक्षिणोत्तरभागेभक्तिविशेषोभक्त्युत्कर्षविशिष्टोभरतशत्रुघ्नौमध्येमध्य
भागेतडिदंबुदौतडित्सदृशीसीताअंबुदसदृशोरामःसीतारामौतडिदाभमंबुदमितिपाठेतडिदाभंवि
द्युत्सदृशसीताद्योतितमेतादृशंविलक्षणमंबुदंमेघंरामरूपंअहंवंदेनमस्करोमि ॥ १२ ॥ ७



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनरपिप्रकारांतरेणस्तौति इंदीवरेति इंदीवरदलनयनंनीलोत्पलदलनेत्रंजलदावलिमंजुंमेघम-
नोहरंमंजूलापांगंसुंदरावलोकंमंदीकृतदशवदनंपराजितरावणंदीनमहोदयंभक्तरक्षणायाऽविर्भू
तं जयंजयस्वरूपंवंदेप्रणौमि॥१३॥इदानींवामेलब्धामेतद्ध्यानंप्रकारांतरेणस्तौति वामेकांचन

इंदीवरदलनयनंजलदावलिमंजुमंजुलापांगं॥मंदीकृतदशवदनंतंदी
नमहोदयंजयंवंदे॥१३॥वामेकांचनवल्लीसल्लीलोऽन्यत्रकांचनोविटपी॥
विलसतिमानसकमलेमध्येहरिनीलकंदलोद्रेकः॥१४॥ छ॥ वल्लीति।वामेकां-

चनवल्लीवामभागेसुवर्णलतासीतालक्षणासल्लीलःसद्विलासःअनत्रदक्षिणेकांचनःसुवर्णाभिःसुव
र्णवद्वर्णोलक्ष्मणःविटपीकल्पतरुर्मानसकमलेमध्येकमलकर्णिकायांविलसतिसर्वोत्कर्षेणशोभते
हरिःसर्वदुःखोपशामकश्चरामरूपःनीलकंदलोद्रेकःनीलांकुरोद्गमःनीलवर्णइतियावत्॥१४॥ छ

For Private And Personal Use Only

पुनरपिजननीरूपत्वेनस्तौतिकमलायमाननेत्रामिति कमलायमाननेत्रापकजसदृशनेत्राममलायतबा
हुसंगिकोदंडांनिर्मलदीर्घबाहुसक्तकार्मुकांशमलावण्यधरित्रींशांतिसलावण्यधरामेतादृशींपुंवेष
धारिणींपुरुषवेषधरांजननींमातरंवंदेनमस्करोमि॥ १५॥पुनरपिप्रकारांतरेणस्तौति पत्तिरिति प

कमलायमाननेत्राममलायतबाहुसंगिकोदंडां।शमलावण्यधरित्रींजन
नींपुंवेषधारिणींवंदे॥१५॥ पत्तिःशरधनुराढ्यासंपत्तिर्योगयोगिना
मीड्या॥स्फुरतिक्षपितविपत्तिःकाञ्चनवित्तिर्ममानिशंचित्ते॥१६॥

त्तिःपादचारिणीशरधनुराढ्याबाणकार्मुकयुक्तासंपत्तिःपूर्णतायोगयोगिनांचित्तवृत्तिनिरोधंयोगं
युंजतितेयोगयोगिनःतेषांसमाधिभाजामित्यर्थः योगिनस्तंप्रपश्यंतिभगवंतंसनातनमितिस्मृतेः ईड्या
स्तवनार्हाक्षपितविपत्तिर्नाशितदैन्याविततिर्नामावस्थाकाञ्चनापूर्वाममचित्तेऽनिशंनिरंतरंस्फुरतिप्रकाशते
॥१६॥



For Private And Personal Use Only

पुनरपिप्रकारांतरेणस्तौति हीरमनोहरेति हीरकमणितुल्यदंतादशशतकरवंशभूषणंसूर्यवंशालंकर
णंकाचनकापिकाचमणीनांनीलानीलकांतिरूपालीलालसंस्वभावालसंचापल्यरहितंममममनःकुरुते
लीलालयमितिपाठे लीलायाःक्रीडायाःआलयंस्थानंममममनःकुरुते स्कंदशावयवसंस्थानमूर्तिरितियाव

हीरमनोहरदशनादशशतकरवंशभूषणंरचना॥काचनकाचमणीनां
नीलालीलालसंमनःकुरुते॥१७॥तूणीकवचरूपाणी।विशिखासनबा
णमंजुलायांती॥वेणीकापिगुणानामेणीदृगुपांतचारिणीजयति॥१८॥

त्॥१७॥पुनरपिसन्नद्धःकवचीतिध्यानंप्रकारांतरेणस्तौति तूणीकवचरूपाणीति तूणीरःकवचंतनु
त्राणंरूपाणोऽसिरेतैर्युक्ताविशिखासनबाणमंजुलामनोहरायांतीति मंजुलापांगीतिपाठेविशिखासनं
धनुर्बाणःशरस्ताभ्यांयुक्तासौमंजुलापांगीमनोहरावलोकागुणानांवेणीगुणगुंफिताकाप्यपूर्वेवताद-

श्येणीकुरंगीममदृग्युपांतचारिणीदृष्टिपथंगताजयतिसर्वोत्कर्षेणवर्तते यद्वा एणीकुरंगीतस्याःदृग्ग्रणं
तेदृष्टयंतेगच्छंती एणीतिदृगितिच्छेदोऽनवद्यःगुणानांवेणीजयति॥१८॥पुनरपिप्रकारांतरेणस्तौति
आननिर्जितचंद्रेति आननिर्जितचंद्रामुखकांत्यातिरस्कृतशशिबिंबासांद्रोनिबिडोयआनंदस्तस्य

आननिर्जितचंद्रासांद्रानंदैकभूमिरुन्निद्रा ॥रमय
तिविगलिततंद्रारावणविद्रा विणीमुद्रा॥१९॥ ॐ

भूमिरधिष्ठानमुन्निद्रानिद्रारहिताप्रकाशरूपेत्यर्थः विगलिततंद्रोत्साहरूपेत्यर्थः निद्रातंद्राशब्दयोः
समानार्थत्वेपिकिंचिद्भेदोपिअवगंतव्यः एतादृशीरावणविद्राविणीरावणनाशकारिणीकापिमुद्राआकृति ३५
र्ममानसंरमयतिआल्हादयतीत्यर्थः॥१९॥ ॥ॐ॥ ॥ॐ॥ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनरपिप्रकारांतरेणस्तौति पाथोधिबद्धसेतुमिति पाथोधिबद्धसेतुंसमुद्रेनिबद्धसेतुंनक्तंचरनाशपि
शुनसत्केतुंराक्षसनाशसूचकध्वजमेतादृशंकंचिच्चिन्मोदकंदलमपूर्वंकंचि च्चैतन्यहर्षांकुरकंदंआपदंवि
पत्तिमंतंनाशंनेतुंप्रापयितुंवंदेप्रणौमि॥१००॥पुनरपिप्रकारांतरेणस्तौति अभिनवे ति अभिनवपल्ल

पाथोधिबद्धसेतुंनक्तंचरनाशपिशुनसत्केतुम्॥आपदमंतंनेतुंकंचिच्चि
न्मोदकंदलंवंदे॥१००॥ अभिनवपल्लवशयनांशयनांतनिविष्टविद्यु-
दुल्लासाम्॥ कांचननिकुरंबांक स्थितशिरसींकांचिदर्थयेलीलां॥१०१॥

वशयनांनूतनपल्लवकृतशय्यांशयनांतनिविष्टविद्युदुल्लासां शयनोपरिस्थितायाविद्युदुपमाजानकीत
स्याउल्लासोप्रेमायस्या एतादृशी तांकांचननिकुरंबांक स्थितशिरसींसीतायाःस्रुवर्णादर्शोवंद्योऽकस्त
स्मिन्स्थितमस्तकामेतादृशींकांचित्कामपिलीलांशृंगारावस्थामर्थयेप्रार्थये॥१०१॥ ७२

पुनरपिविषवल्लीरूपत्वेनस्तौति कुटिलाशयविषवल्लीत्ति कुटिलाशयविषवल्लीमनृजुमानसनाशकल
तांजटिलांजटाभारयुक्तांजटामुकुटमित्यर्थः निबिडोल्लसच्छ्रमांबुकणांसान्द्रशोभायुक्तश्रमस्वेदांबु
साकरांनिटिलोल्लसदितिपाठेभालेउल्लसंतःशोभमानाःश्रमोद्भवांबुकणाःबिंदवस्तैर्युक्तामित्यर्थः व

कुटिलाशयविषवल्लींजटिलांनिबिडोल्लसच्छ्रमांबुकणां॥
वल्कलकल्पितवसनांरावणवधवासनांमुदावंदे॥१०२॥

ल्कलकल्पितवसनांभूर्जत्वगादिपरिधानामेतादृशींरावणवधवासनांदशाननक्षयवासनामहंमुदाह
र्षोत्कर्षेणवंदेनमस्करोमि ॥१०२॥ पुनरपिमायारूपत्वेनस्तौति अकपटपटुकपिकटकामिति नि- ३६
ष्कपटकुशलवानरसेनांनटकामितयानटाभिनयेच्छया अभिनीतंदर्शितंवैक्लव्यंविकलताययातांत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुचितंवैकुर्व्ययोग्यमुपचारनचयंप्रकारसमूहंरचयंतींकुर्वतीमेताटृशींकांचित्कामपिमायांमायाशक्तिम
र्थयेप्रार्थये॥१०३॥ पुनरपिप्रकारांतरेणलतारूपत्वेनस्तौति अंबरमणीति अंबरमणिकुलभूषांसूर्य
कुलालंकाररूपांशंबररिपुवैरिभक्तिमंजूषांशंबररिपुःकामस्तस्यवैरीशिवस्तत्कृतायाभक्तिस्तस्याःमंजू

अकपटपटुकपिकटकांनटकामितयाभिनीतवैकुर्व्यां॥तदुचितमुपचार
चयंरचयंतींकांचिदर्थयेमायां॥१०३॥ अंबरमणिकुलभूषांशंबररिपुवैरि
भक्तिमंजूषां॥ कामपिकामपिकानांरसाललतिकांनिकाममवलंबे॥१०४॥

षांपेटिकांकामप्यपूर्वांकामपिकानांकामाएवपिकाकोकिलाःधर्मार्थकाममोक्षेच्छारूपास्तेषांरसालल
तिकांआम्रलतांनिकाममतिशयेनावलंबेसमाश्रये॥१०४॥ पुनरपिप्रकारांतरेणभूधरत्वेनस्तौति
स्फुरसरिदिति स्फुरसरिद्गंगातस्याःसोदरंदृश्यत्वेनसमानंयच्चामरंतत्करेयस्याताटृशीयःसोदरोबंधुः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेनानुगतंसहितंकिंचिदुदंचितपंचकचेलंकिंचिदुदंचितंप्रकाशितंयच्चंपकपुष्पवच्चेलं कंचिदुदंचिते
तिपाठेकंचिदपूर्वंभूधरंस्फनीलंश्यामंशैलंभूधरंअवलंबेसंश्रये॥१०५॥ पुनरपिप्रकारांतेरणक्रोधरूप
त्वेनस्तौति आकर्णकृष्टेति आकर्णांतिंकर्णोपांतपर्यंतंकृष्टमाकर्षितंचापंधनुर्येनसः आकर्णकृष्टचा-

स्फरसरिदवरजन्वंच्चामरकरसोदरानुगतं॥ किंचिदुदंचितचंपकचेलं
शैलंस्फनीलमवलंबे॥१०५॥ आकर्णकृष्टचापंवर्षंतंबाणवृष्टिमुत्तमांगे
षु॥ वंदेयोगिदुरापंकंचनहुंकारस्फंदरंकोपम्॥१०६॥ छ

पस्तमाकर्णकृष्टचापं पुनःकथंभूतंबाणवृष्टिमुत्तमांगेषुवर्षंतंशत्रुमूर्धसुबाणसंपातंकुर्वंतमित्यर्थः ३७
कथंभूतंयोगिदुरापंयोगीश्वराणामपिकष्टलभ्यंएतादृशंकंचनकमपिहुंकारस्फंदरंहुंकृतिशब्दरुचिरंस्फं

दरंकोपंवंदे॥१०६॥पुनरपिप्रकारांतरेणस्तौति खंडितेति खंडितंशकलीकृतंहरकोदंडंशिवधनुर्यया सा खंडितहरकोदंडाब्रम्हांडकरंडमंडनीभूताब्रम्हांडमेवकरंडस्तस्यमंडनीभूताऽलंकरणीभूताएतादृशीवैदेहीगलमालासीताकंठसक्तास्रग्विलसतिशोभते किंभूताविभक्तांगीभिन्नशरीरासीतागौरांगीरामचनी-

खंडितहरकोदंडाब्रम्हांडकरंडमंडनीभूता॥वैदेही
गलमालाविलसतिनीलाविभक्तांगी॥१०७॥ ❀

लांगीत्यर्थः यद्वाअविभक्तांगीशक्तिशक्तिमतोरभेदादित्यर्थः॥१०७॥पुनरपिप्रकारांतरेणकरुणारूपत्वेनस्तौति धनुषेति धनुषाशरासनेन किंलक्षणेनधनुषारिपुजयजनुषाशत्रुजयजनुषाशत्रुजयजन्मनारुचिरतरःअतिसुंदरःआकारआकृतिस्तयानिर्जितोऽधरीकृतोंबुधरोमेघोययासा पुनःकिं

भूतातरुणारुणनिभचरणारक्तपदपंकजा यद्वातरुणोयोऽरुणःसूर्यसारथिस्तद्वुपमपदाकाचनका
प्यपूर्वाकरुणामेममहृदयंरुणद्धिव्याप्नोतीत्यर्थः॥ १०८॥ ॥ इतिश्रीविद्वन्मुकुटमुद्गलभट्टवि
रचितंरामार्याशतमष्टाधिकंसंपूर्णम्॥ ॥ राघवमेघोमेघोविद्युद्दासांवरावृतःप्रवरः॥जीवन

धनुषारिपुजयजनुषारुचिरतराकारनिर्जितांबुधरा॥
तरुणारुणनिभचरणाकाचनकरुणारुणद्धिमेहृदयं॥१०८॥

दातासविताहृदयाकाशेसदासमुल्लसतु॥ १॥ धनुर्बाणधरंधीरंदशाननविमर्दनम्॥ प्रफुल्लनयनां-
भोजंभजेदशरथात्मजम्॥ २॥ पदार्थद्योतनीत्वेयंदीपिकार्यानुकूलिनी॥ काकंभट्टैःस्फुरचितास्वस्क
स्वांस्येमुदास्फुटम्॥३॥ मार्गशीर्षेसितेऽष्टम्यांसौम्येथविकृतोशुभा॥ सिद्धेयंदीपिकार्याणांमुदंवहृतस

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्वदा॥ ४॥ इतिकाकंभट्टविरचितापदार्थद्योतनीदीपिकासमाप्ता॥ ॥ हेंपुस्तकमुंबईत ग्रंथप्रकाशकछापरवान्यांत छापिलें॥ शके१७८२ रौद्रनामसंवत्सरे॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिमुद्गलाचार्यकृतार्यशितकंसमाप्तम्

For Private And Personal Use Only